# Brahma Gita of Yoga Vasishtha

# બ્રહ્મગીતા યોગવાસિષ્ઠાન્તર્ગતા

## Document Information

Text title : Brahma Gita (in Yoga Vasishtha)

File name : brahmagItAyogavAsiShTha.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : unknown

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Nov. 13, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Brahma Gita of Yoga Vasishtha

# બ્રહ્મગીતા યોગવાસિષ્ઠાન્તર્ગતા

Yoga Vasishtha - MokSha-Nirvana Uttarardha Brahmagita - Chs. 173-186

॥ યોગવાસિષ્ઠાન્તર્ગતા બ્રહ્મગીતા ॥


| સર્ગ-ક્રમાઙ્ક | નામ | શ્લોકસઙ્ખ્યા |
|---|---|---|
| ૧ - ૧૭૩ | પરમાર્થોપદેશઃ | ૩૪ |
| ૨ - ૧૭૪ | નિર્વાણોપદેશઃ | ૩૦ |
| ૩ - ૧૭૫ | અદ્વૈતયુક્તિઃ | ૭૯ |
| ૪ - ૧૭૬ | બ્રહ્માણ્ડોપાખ્યાનમ્ | ૨૫ |
| ૫ - ૧૭૭ | સત્યવર્ણનમ્ | ૪૪ |
| ૬ - ૧૭૮ | ઐન્દવોપાખ્યાનમ્ | ૬૪ |
| ૭ - ૧૭૯ | બ્રહ્મમયત્વપ્રતિપાદનમ્ | ૨૨ |
| ૮ - ૧૮૦ | તાપસોપાખ્યાનમ્ | ૪૧ |
| ૯ - ૧૮૧ | ગૌર્યાશ્રમવર્ણનમ્ | ૩૯ |
| ૧૦ - ૧૮૨ | સપ્તદીપેશ્વર | ૫૩ |
| ૧૧ - ૧૮૩ | દ્વીપસપ્તકાષ્ટકવર્ણનમ્ | ૭૦ |
| ૧૩ - ૧૮૫ | કુન્દદન્તપ્રબોધઃ | ૨૭ |
| ૧૪ - ૧૮૬ | સર્વં ખલ્વિદં બ્રહ્મેતિ-<br>પ્રતિપાદનયોગોપદેશઃ | ૯૦ |
| | | ૬૧૮ |


॥ અથ પ્રારભ્યતે યોગવાસિષ્ઠાન્તર્ગતા બ્રહ્મગીતા ॥

શ્રીરામ ઉવાચ ।
સર્વાનુભવરૂપસ્ય તથા સર્વાત્મનોઽપ્યયમ્ ।
અનન્તસ્યાત્મતત્ત્વસ્ય દેહેઽપિ કિમહંગ્રહઃ ॥ ૧॥

ચિતઃ પાષાણકાષ્ઠત્વં સ્વપ્નાદિષુ કથં ભવેત્ ।
ઇદં પાષાણકાષ્ઠાદિ કથં નાસ્ત્યસ્તિ વા કથમ્ ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
શરીરિણો યથા હસ્તે હસ્તતાયાં યથાગ્રહઃ ।
સર્વાત્મનસ્તથા દેહે દેહતાયાં તથાગ્રહઃ ॥ ૩॥

પાદપસ્થ યથા પત્રે પત્રતાયાં યથાગ્રહઃ ।
સર્વાત્મનસ્તથા વૃક્ષે વૃક્ષતાયાં તથાગ્રહઃ ॥ ૪॥

આકાશસ્ય યથા શૂન્યે શૂન્યતાયાં યથાગ્રહઃ ।
સર્વાત્મનસ્તથા દ્રવ્યે દ્રવ્યતાયાં તથાગ્રહઃ॥ ૫॥

સ્વપ્નોચિતઃ સ્વપ્નપુરે રૂપતાયાં યથાગ્રહઃ ।
સર્વાત્મનસ્તથા સ્વપ્નજાગ્રદાદૌ તથાગ્રહઃ ॥ ૬॥

યથાગેન્દ્રે દૃષદ્વૃક્ષવાર્યાદૌ સ તથાગ્રહઃ ।
તથા સર્વાત્મનોઽગેન્દ્રપુરતાયાં તથાગ્રહઃ ॥ ૭॥

શરીરસ્ય યથા કેશનખાદિષુ યથાગ્રહઃ ।
સર્વાત્મનસ્તથા કાષ્ઠદૃષદાદૌ તથાગ્રહઃ ॥ ૮॥

ચિત એવ યથા સ્વપ્ને ભવેત્કાષ્ઠોપલાદિતા ।
ચિદાકાશસ્ય સર્ગાદૌ તથૈવાવયવાદિતા ॥ ૯॥

ચેતનાચેતનાત્મૈકં પુરુષસ્ય યથા વપુઃ ।
નખકેશજલાકાશધર્મમાકારભાસુરમ્ ॥ ૧૦॥

ચેતનાચેતનાત્મૈકં તથા સર્વાત્મનો વપુઃ ।
જઙ્ગમં સ્થાવરમયં કિન્તુ નિત્યમનાકૃતિ ॥ ૧૧॥

યથાસ્થિતં શામ્યતીદં સમ્યગ્જ્ઞાનવતો જગત્ ।
સ્વપ્ને સ્વપ્નપરિજ્ઞાતુર્યથા દૃષ્ટાર્થસંભ્રમઃ ॥ ૧૨॥

ચિન્માત્રાકાશમેવેદં ન દ્રષ્ટાસ્તિ ન દૃશ્યતા ।
ઇતિ મૌનમલં સ્વપ્નદ્રષ્ટુર્યત્સા પ્રબુદ્ધતા ॥ ૧૩॥

કલ્પકોટિસહસ્રાણિ સર્ગા આયાન્તિ યાન્તિ ચ ।
ત એવાન્યે ચ ચિદ્વ્યોમ્નિ જલાવર્તા ઇવાર્ણવે ॥ ૧૪॥

કરોત્યબ્ધૌ યથોર્મ્યાદૌ નાના કચકચં વપુઃ ।
ચિત્કરોતિ તથા સઞ્જ્ઞાઃ સર્ગાદ્યાશ્ચેતને નિજે ॥ ૧૫॥

યથાસ્થિતમિદં વિશ્વં બ્રહ્મૈવાનામયં સદા ।

તત્ત્વજ્ઞં પ્રત્યતત્ત્વજ્ઞજનતાનિશ્ચયાદૃતે ॥ ૧૬॥

નાહં તરઙ્ગઃ સલિલમહમિત્યેવ યુક્તિતઃ ।
બુદ્ધં યેન તરઙ્ગેણ કુતસ્તસ્ય તરઙ્ગતા ॥ ૧૭॥

બ્રહ્મણોઽસ્ય તરઙ્ગત્વમિવાભાનં યતસ્તતઃ ।
તરઙ્ગત્વાતરઙ્ગત્વે બ્રાહ્મ્યૌ શક્તી સ્થિતિં ગતે ॥ ૧૮॥

ચિદ્વ્યોમ્નોઽત્યજતો રૂપં સ્વપ્નવદ્વ્યસ્તવેદનમ્ ।
તદિદં હિ મનો રામ બ્રહ્મેત્યુક્તઃ પિતામહઃ ॥ ૧૯॥

એવમાદ્યઃ પ્રજાનાથો નિરાકારો નિરામયઃ ।
ચિન્માત્રરૂપસઙ્કલ્પપુરવત્કારણોજ્ઝિતઃ ॥ ૨૦॥

યેનાઙ્ગદત્વં નાસ્તીતિ બુદ્ધં હેમાઙ્ગદેન વૈ ।
અઙ્ગદત્વં કુતસ્તસ્ય તસ્ય શુદ્ધેવ હેમતા ॥ ૨૧॥

અજે સઙ્કલ્પમાત્રાત્મચિન્માત્રવ્યોમદેહિનિ ।
અહં ત્વં જગદિત્યાદિ યદ્વિભાતં તદેવ તત્ ॥ ૨૨॥

ચિચ્ચમત્કૃતયો ભાન્તિ યાશ્ચિદ્વ્યોમનિ શૂન્યતાઃ ।
એતાસ્તાઃ સર્ગસંહારસ્થિતિસંરભસંવિદઃ ॥ ૨૩॥

અચ્છં ચિન્માત્રનભસઃ કચનં સ્વયમેવ તત્ ।
સ્વપ્નાભં ચિત્તતામાત્રં સ એષ પ્રપિતામહઃ ॥ ૨૪॥

યથા તરઙ્ગસ્તેનૈવ રૂપેણાન્યેન વાનિશમ્ ।
સ્ફુરત્યેવમનાદ્યન્તઃ સર્ગપ્રલયવિભ્રમઃ ॥ ૨૫॥

ચિદ્વ્યોમ્નઃ કચનં કાન્તં યદ્વિરાડિતિ શબ્દિતમ્ ।
ભવેત્સઙ્કલ્પપુરવત્તસ્ય કુર્યાન્મનોઽપિ વૈ ॥ ૨૬॥

સર્ગઃ સ્વપ્નઃ સ્વપ્ન એવ જાગ્રદ્દેહઃ સ એવ ચ ।
ઘનં સુષુપ્તં તૈમિર્યાદ્યથા સંવેદનં ભવેત્ ॥ ૨૭॥

તસ્ય કલ્પાન્તરજની શિરોરુહતયોદિતા ।
પ્રકાશતમસી કાલક્રિયાખ્યાઃ સ્વાઙ્ગસન્ધયઃ ॥ ૨૮॥

તસ્યાગ્નિરાસ્યં દ્યૌર્મૂર્ધા ખં નાભિશ્ચરણૌ ક્ષિતિઃ ।
ચન્દ્રાર્કૌ દૃગ્દિશૌ શ્રોત્રે કલ્પનેતિ વિજૃમ્ભિતા ॥ ૨૯॥

એવં સમ્યગ્દૃશ્યમાનો વ્યોમાત્મા વિતતાકૃતિઃ ।
અસ્મત્સઙ્કલ્પશૈલાભો વિરાટ્ સ્વપ્નાકૃતિસ્થિતઃ ॥ ૩૦॥

યચ્ચ ચેતચ્ચિદાકાશે સ્વયં કચકચાયતે ।
તદેતજ્જગદિત્યેવં તેનાત્મૈવાનુભૂયતે ॥ ૩૧॥

વિરાડાત્મૈવમાકાશં ભાતિ ચિન્મયમાતતમ્ ।
સ્વભાવસ્વપ્નનગરં નગનાગમયાત્મકમ્ ॥ ૩૨॥

અનુભવિતૈવાનુભવં સત્યં સ્વાત્માનમપ્યસન્તમિવ ।
અનુભવતીયત્ત્વેન સ્વપ્નનટઃ સ્વપ્નદેશમિવ ॥ ૩૩॥

વેદાન્તાર્હતસાઙ્ખ્યસૌગતગુરુત્ર્યક્ષાદિસૂક્તાદૃશો
    બ્રહ્મૈવ સ્ફુરિતં તથાત્મકલયાસ્તાદાત્મનિત્યં યતઃ ।
તેષાં ચાત્મવિદોઽનુરૂપમખિલં સ્વર્ગં ફલં તદ્ભવ-
    ત્યસ્ય બ્રહ્મણ ઈદૃગેવ મહિમા સર્વાત્મ યત્તદ્વપુઃ ॥ ૩૪॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ પરમાર્થોપદેશો
નામ ત્રિસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૭૩॥ -૧-

---

॥ અથ દ્વિતીયોઽધ્યાઃ ॥

॥ નિર્વાણોપદેશઃ ॥

વસિષ્ઠ ઉવાચ ।
સર્ગાદૌ સ્વપ્નસંવિત્યા ચિદેવાભાતિ કેવલા ।
જગદિત્યવભાસેવ બ્રહ્મૈવાતો જગત્ત્રયમ્ ॥ ૧॥

સર્ગાસ્તરઙ્ગા બ્રહ્માબ્ધેસ્તેષુ સંવેદનં દ્રવઃ ।
સર્ગાન્તરં સુખાદ્યાત્મ દ્વૈત્યૈક્યાદીતરત્કુતઃ ॥ ૨॥

યથા સ્વપ્નસુષુપ્તાત્મ નિદ્રારૂપકમેવ ખમ્ ।
દૃશ્યાદૃશ્યાંશમેકાત્મ રૂપં ચિન્નભસ્તથા ॥ ૩॥

જાગ્રતિ સ્વપ્નનગરં યાદૃક્તાદૃગિદં જગત્ ।
પરિજ્ઞાતં ભવેદત્ર કથામાસ્થા વિવેકિનઃ ॥ ૪॥

સર્ગાદૌ સર્ગસંવિત્તેર્યથાભૂતાર્થવેદનાત્ ।

જાગ્રતિ સ્વાપ્નનગરં યાદૃશં તાદૃશં જગત્ ॥ ૫॥

જાગ્રતિ સ્વપ્નનગરવાસના વિવિધા યથા ।
સત્યા અપિ ન સત્યાસ્તા જાગ્રત્યો વાસનાસ્તથા ॥ ૬॥

અન્યથોપપ્રપદ્યેહ કલ્પ્યતે યદિ કારણમ્ ।
તત્કિં નેદીયસી નાત્ર ભ્રાન્તતા કલ્પ્યતે તથા ॥ ૭॥

સ્વાનુભૂયત એવેયં ભ્રાન્તિઃ સ્વપ્નજગત્સ્વિવ ।
કારણં ત્વનુમાસાધ્યં ક્વાનુમાનુભવાધિકા ॥ ૮॥

દૃષ્ટમપ્યસ્તિ યન્નેશે ન ચાત્મનિ વિચારિતમ્ ।
અન્યથાનુપપત્ત્યાન્તર્ભ્રાન્ત્યાત્મ સ્વપ્નશૈલવત્ ॥ ૯॥

નિર્વિકલ્પં પરં જાડ્યં સવિકલ્પં તુ સંસૃતિઃ ।
ધ્યાનં તેન સમાધાનં ન સંભવતિ કિઞ્ચન ॥ ૧૦॥

સચેત્યં સંસૃતિર્ધ્યાનમચેત્યં તૂપલસ્થિતિ ।
મોક્ષો નોપલવદ્ભાનં ન વિકલ્પાત્મકં તતઃ ॥ ૧૧॥

ન ચ નામોપલાભેન નિર્વિકલ્પસમાધિના ।
અન્યદાસાદ્યતે કિઞ્ચિલ્લભ્યતે કિં સ્વનિદ્રયા ॥ ૧૨॥

તસ્માત્સમ્યક્પરિજ્ઞાનાદ્ભ્રાન્તિમાત્રં વિવેકિનઃ ।
સર્ગાત્યન્તાસંભવતો યો જીવન્મુક્તતોદયઃ ॥ ૧૩॥

નિર્વિકલ્પં સમાધાનં તદનન્તમિહોચ્યતે ।
યથાસ્થિતમવિક્ષુબ્ધમાસનં સર્વભાસનમ્ ॥ ૧૪॥

તદનન્તસુષુપ્તાખ્યં તત્તુરીયમિતિ સ્મૃતમ્ ।
તન્નિર્વાણમિતિ પ્રોક્તં તન્મોક્ષ ઇતિ શબ્દિતમ્ ॥ ૧૫॥

સમ્યગ્બોધૈકઘનતા યાસૌ ધ્યાનમિતિ સ્મૃતમ્ ।
દૃશ્યાત્યન્તાસંભવાત્મ બોધમાહુઃ પરં પદમ્ ॥ ૧૬॥

તચ્ચ નોપલવજ્જાડ્યં ન સુષુપ્તોપમં ભવેત્ ।
ન નિર્વિકલ્પં ન ચ વા સવિકલ્પં ન વાપ્યસત્ ॥ ૧૭॥

દૃશ્યાત્યન્તાસંભવાત્મ તદેવાદ્યં હિ વેદનમ્ ।
તત્સર્વં તન્ન કિઞ્ચિચ્ચ તદ્વદેવાઙ્ગ વેત્તિ તત્ ॥ ૧૮॥

સમ્યક્પ્રબોધાન્નિર્વાણં પરં તત્સમુદાહૃતમ્ ।
યથાસ્થિતમિદં વિશ્વં તત્રાલંપ્રલયં ગતમ્ ॥ ૧૯॥

ન તત્ર નાનાનાના ન ન ચ કિઞ્ચિન્ન કિઞ્ચન ।
સમસ્તસદ સદ્ભાવસીમાન્તઃ સ ઉદાહૃતઃ ॥ ૨૦॥

અત્યન્તાસંભવં દૃશ્યં યદ્વૈ નિર્વાણમાસિતમ્ ।
શુદ્ધબોધોદયં શાન્તં તદ્વિદ્ધિ પરમં પદમ્ ॥ ૨૧॥

સ ચ સમ્પ્રાપ્યતે શુદ્ધો બોધો ધ્યાનમનુત્તમમ્ ।
શાસ્ત્રાત્પદપદાર્થજ્ઞબોધિનોત્પન્નબુદ્ધિના ॥ ૨૨॥

મોક્ષોપાયાભિધં શાસ્ત્રમિદં વાચયતાનિશમ્ ।
બુદ્ધ્યુપાયેન શુદ્ધેન પુંસા નાન્યેન કેનચિત્ ॥ ૨૩॥

ન તીર્થેન ન દાનેન ન સ્નાનેન ન વિદ્યયા ।
ન ધ્યાનેન ન યોગેન ન તપોભિર્ન ચાધ્વરૈઃ ॥ ૨૪॥

ભ્રાન્તિમાત્રં કિલેદં સદસત્સદિવ લક્ષ્યતે ।
વ્યોમૈવ જગદાકારં સ્વપ્નોઽનિદ્રે ચિદંબરે ॥ ૨૫॥

ન શામ્યતિ તપસ્તીર્થૈર્ભ્રાન્તિર્નામ કદાચન ।
તપસ્તીર્થાદિના સ્વર્ગાઃ પ્રાપ્યન્તે ન તુ મુક્તતા ॥ ૨૬॥

ભ્રાન્તિઃ શામ્યતિ શાસ્ત્રાર્થાત્સમ્યગ્બુદ્ધ્યાવલોકિતાત્ ।
આત્મજ્ઞાનમયાન્મોક્ષોપાયાદેવેહ નાન્યતઃ ॥ ૨૭॥

આલોકકારિણાત્યર્થં શાસ્ત્રાર્થેનૈવ શામ્યતિ ।
અમલેનાખિલા ભ્રાન્તિઃ પ્રકાશેનૈવ તામસી ॥ ૨૮॥

સર્ગસંહારસંસ્થાનાં ભાસો ભાન્તિ ચિદંબરે ।
સ્પન્દનાનીવ મરુતિ દ્રવત્વાનીવ વારિણિ ॥ ૨૯॥

દ્રવ્યસ્ય હૃદ્યેવ ચમત્કૃતિર્નિજા
    નભસ્વતઃ સ્પન્દ ઇવાનિશં યથા ।
યથા સ્થિતા સૃષ્ટિરિયં તથાસ્તિતા
    લયં નભસ્યન્તરનન્યરૂપિણી ॥ ૩૦॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ નિર્વાણોપદેશો

નામ ચતુઃસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૭૪॥ -૨-

---

॥ અથ તૃતીયોઽધ્યાયઃ ॥

॥ અદ્વૈતયુક્તિઃ ॥

વસિષ્ઠ ઉવાચ ।
સ્વપ્નાભમાદ્યં ચિદ્વ્યોમ કારણં દેહસંવિદામ્ ।
દૃશ્યાન્યતા સંભવતશ્ચિદ્વ્યોમ્નસ્તત્કુતો વપુઃ ॥ ૧॥

સર્ગાદૌ સ્વપ્નસંવિત્તિરૂપં સર્વં વિનાનઘ ।
ન સર્ગો ન પરો લોકો દૃશ્યમાનોઽપિ સિધ્યતિ ॥ ૨॥

અસદેવાનુભૂરિત્થમેવેદં ભાસતે જગત્ ।
સ્વપ્નાઙ્ગનાસઙ્ગ ઇવ શાન્તં ચિદ્વ્યોમ કેવલમ્ ॥ ૩॥

એવં નામાસ્તિ ચિદ્ધાતુરનાદિનિધનોઽમલઃ ।
શૂન્યાત્મૈવાચ્છરૂપોઽપિ જગદિત્યવભાતિ યઃ ॥ ૪॥

મલસ્ત્વેષોઽપરિજ્ઞાતઃ પરિજ્ઞાતઃ પરં ભવેત્ ।
કુતઃ કિલ પરે વ્યોમન્યનાદિનિધને મલઃ ॥ ૫॥

યદેતદ્વેદનં શુદ્ધં તદેવ સ્વપ્નપત્તનમ્ ।
જગત્તદેવ સર્ગાદૌ પૃથ્વ્યાદેઃ સંભવઃ કુતઃ ॥ ૬॥

ચિદ્વ્યોમાત્માવભાસસ્ય નભસઃ સર્ગરૂપિણી ।
કૃતા પૃથ્વ્યાદિકલતા મનોબુદ્ધ્યાદિતા તથા ॥ ૭॥

વાર્યાવર્ત ઇઅવાભાતિ પવનસ્પન્દવચ્ચ યત્ ।
અબુદ્ધિપૂર્વં ચિદ્વ્યોમ્નિ જગદ્ભાનમભિત્તિમત્ ॥ ૮॥

પશ્ચાત્તસ્યૈવ તેનૈવ સ્વયમૈશ્વર્યશંસિના ।
કૃતં બુદ્ધ્યાદિપૃથ્વ્યાદિકલ્પનં સદસન્મયમ્ ॥ ૯॥

સ્વયમેવ કચત્યચ્છાચ્છાયેયં સ્વા મહાચિતિઃ ।
સર્ગાભિધાનમસ્યૈવ નભ એવેહ નેતરત્ ॥ ૧૦॥

ન ચ કિઞ્ચન નામાઙ્ગ કચત્યચ્છૈવ સા સ્મૃતા ।
ચિન્માત્રૈકૈકકલનં તતમેવાત્મનાત્મનિ ॥ ૧૧॥

ચિદાકાશશ્ચિદાકાશે તદિદં સ્વમલ વપુઃ ।
ચિત્તં દૃશ્યમિવાભાતિ સ્વપ્ને તથા સ્થિતમ્ ॥ ૧૨॥

અન્યથાનુપપન્યાર્થકારણાભાવતઃ સ્વતઃ ।
સર્ગાદાવેવ સ્વાત્મૈવ દૃશ્યં ચિદ્વ્યોમ પશ્યતિ ॥ ૧૩॥

સ્વપ્નવત્તચ્ચ નિર્ધર્મ મનાગપિ ન ભિદ્યતે ।
તસ્માચ્ચિદ્વ્યોમ ચિદ્વ્યોમ શૂન્યત્વં ગગનાદિવત્ ॥ ૧૪॥

યદેવ તત્પરં બ્રહ્મ સર્વરૂપવિવર્જિતમ્ ।
તદેવૈકં તથારૂપમેવં સર્વતયા સ્થિતમ્ ॥ ૧૫॥

સ્વપ્નેઽનુભૂયતે ચૈતત્સ્વપ્નો હ્યાત્મૈવ ભાસતે ।
નાનાબોધમનાનૈવ બ્રહ્મૈવામલમેવ તત્ ॥ ૧૬॥

બ્રહ્મૈવાત્મનિ ચિદ્ભાવાજ્જીવત્વમિવ કલ્પયત્ ।
રૂપમન્યજદેવાચ્છં મનસ્તામિવ ગચ્છતિ ॥ ૧૭॥

ઇદં સર્વં તનોતીવ તચ્ચ ખાત્મકમેવ ખમ્ ।
ભવતીવ જગદ્રૂપં વિકારીવાવિકાર્યપિ ॥ ૧૮॥

મન એવ સ્વયં બ્રહ્મા સ સર્ગમ્ય હૃદિ સ્થિતઃ ।
કરોત્યવિરતં સર્વમજસ્રં સંહરત્યપિ ॥ ૧૯॥

પૃથ્વાદિરહિતો યસ્મિન્મનોહૃદ્યઙ્ગવર્જિતે ।
અન્યદ્વા ત્રિજગદ્ભાતિ યથા સ્વપ્ને નિરાકૃતિ ॥ ૨૦॥

દેહરૂપજગદ્રૂપૈરહમેકમનાકૃતિ ।
મનસ્તિષ્ઠામ્યનન્તાત્મબોધાબોધં પરાભવમ્ ॥ ૨૧॥

નેહ પૃથ્વ્યાદિ નો દેહો ન ચૈવાન્યાસ્તિ દૃશ્યતા ।
જગત્રયા કેવલં ખં મનઃ કચકચાયતે ॥ ૨૨॥

વિચાર્યદૃષ્ટ્યૈતદપિ ન કિઞ્ચિદપિ વિદ્યતે ।
કેવલં ભાતિ ચિન્માત્રમાત્મનાત્મનિ નિર્ધનમ્ ॥ ૨૩॥

યતો વાચો નિવર્તન્તે તૂષ્ણીંભાવોઽવશિષ્યતે ।
વ્યવહાર્યપિ ખાત્મૈવ તદ્વત્તિષ્ઠતિ મૂકવત્ ॥ ૨૪॥

અનન્તાપારપર્યન્તા ચિન્માત્રપરમેષ્ટકા ।
તૂષ્ણીંભૂત્વા ભવત્યેષ પ્રબુદ્ધઃ પુરુષોત્તમઃ ॥ ૨૫॥

અબુદ્ધિપૂર્વં દ્રવતો યથાવર્તાદયોઽમ્ભસિ ।
ક્રિયન્તે બ્રહ્મણા તદ્વચ્ચિત્તબુદ્ધ્યાદયો જડાઃ ॥ ૨૬॥

અબુદ્ધિપૂર્વં વાતેન ક્રિયતે સ્પન્દનં યથા ।
અનન્યદેવં બુદ્ધ્યાદિ ક્રિયતે પરમાત્મના ॥ ૨૭॥

અનન્યદાત્મનો વાયોર્યથા સ્પન્દનમવ્યયમ્ ।
અનન્યદાત્મનસ્તદ્વચ્ચિન્માત્રં પરમાત્મનઃ ॥ ૨૮॥

ચિદ્વ્યોમ બ્રહ્મચિન્માત્રમાત્મા ચિતિ મહાનિતિ ।
પરમાત્મેતિ પર્યાયા જ્ઞેયા જ્ઞાનવતાં વર ॥ ૨૯॥

બ્રહ્મોન્મેષનિમેષાત્મ સ્પન્દાસ્પન્દાત્મ વાતવત્ ।
નિમેષો યાદૃગેવાસ્ય સમુન્મેષસ્તથા જગત્ ॥ ૩૦॥

દૃશ્યમસ્ય સમુન્મેષો દૃશ્યાભાવો નિમેષણમ્ ।
એકમેતન્નિરાકારં તદ્દ્વયોરપ્યુપક્ષયાત્॥ ૩૧॥

નિમેષોન્મેષયોરેકરૂપમેવ પરં મતમ્ ।
અતોઽસ્તિ દૃશ્યં નાસ્તીતિ સદસચ્ચ સદાચિતિઃ ॥ ૩૨॥

નિમેષો નાન્ય ઉન્મેષાન્નોન્મેષોઽપિ નિમેષતઃ ।
બ્રહ્મણઃ સર્ગવપુષો નિમેષોન્મેષરૂપિણઃ ॥ ૩૩॥

તદ્યથાસ્થિતમેવેદં વિદ્ધિ શાન્તમશેષતઃ ।
અજાતમજરં વ્યોમ સૌમ્યં સમસમં જગત્ ॥ ૩૪॥

ચિદચિત્યાત્મકં વ્યોમ રૂપં કચકચાયતે ।
ચિન્નામ તદિદં ભાતિ જગદિત્યેવ તદ્વપુઃ ॥ ૩૫॥

ન નશ્યતિ ન ચોત્પન્નં દૃશ્યં નાપ્યનુભૂયતે ।
સ્વયં ચમત્કરોત્યન્તઃ કેવલં કેવલૈવ ચિત્ ॥ ૩૬॥

મહાચિદ્વ્યોમમણિભા દૃશ્યનામ્ની નિજાકરાત્ ।
અનન્યાન્યેવ ભાતાપિ ભાનુભાસ ઇવોષ્ણતા ॥ ૩૭॥

સુષુપ્તં સ્વપ્નવદ્ભાતિ બ્રહ્મૈવ સર્ગવત્ ।
સર્વમેકં શિવં શાન્તં નાનેવાપિ સ્થિતં સ્ફુરત્ ॥ ૩૮॥

યદ્યત્સંવેદ્યતે યાદૃક્સદ્વાસદ્વા યથા યદા ।

તથાનુભૂયતે તાદૃક્તત્સદસ્ત્વસદસ્તુ વા ॥ ૩૯॥

અન્યથાનુપપત્યા ચેત્કારણં પરિકલ્પ્યતે ।
તત્સ્વપ્નાભો જગદ્ભાવાદન્યથા નોપપદ્યતે ॥ ૪૦॥

પ્રમાતીતાત્પરાદ્વિશ્વમનન્યદુદિતં યતઃ ।
પ્રમાતીતમિદં ચૈવ કિઞ્ચિન્નાભ્યુદિતં તતઃ ॥ ૪૧॥

યસ્ય યદ્રસિકં ચિત્તં તત્તથા તસ્ય ગચ્છતિ ।
બ્રહ્મૈકરસિકં તેન મનસ્તત્તાં સમશ્નુતે ॥ ૪૨॥

યચ્ચિત્તો યદ્ગતપ્રાણો જનો ભવતિ સર્વદા ।
તત્તેન વસ્ત્વિતિ જ્ઞાતં જાનાતિ તદસૌ સ્ફુટમ્ ॥ ૪૩॥

બ્રહ્મૈકરસિકં યત્સ્યાન્મનસ્તત્તદ્ભવેત્ક્ષણાત્ ।
યસ્ય યદ્રસિકં ચેતો બુદ્ધં તેન તદેવ સત્ ॥ ૪૪॥

વિશ્રાન્તં યસ્ય વૈ ચિત્તં જન્તોસ્તત્પરમાર્થસત્ ।
વ્યવહૃત્યૈ કરોત્યન્યત્સદાચારાદતદ્રસમ્ ॥ ૪૫॥

દ્વિત્વૈકત્વાદિકલના નેહ કાચન વિદ્યતે ।
સત્તામાત્રં ચ દૃગિયમિતશ્ચેદલમીક્ષ્યતે ॥ ૪૬॥

અદૃશ્યદૃશ્યસદસન્મૂર્તામૂર્તદૃશામિહ ।
નૈવાસ્તિ ન ચ નાસ્ત્યેવ કર્તા ભોક્તાથવા ક્વચિત્ ॥ ૪૭॥

ઇદમિત્થમનાદ્યન્તં જગત્પર્યાયમાત્મનિ ।
બ્રહ્મૈકઘનમાશાન્તં સ્થિતં સ્થાણુરિવાધ્વનિ ॥ ૪૮॥

યદેવ બ્રહ્મબુદ્ધ્યાદિ તદેવૈતન્નિરઞ્જનમ્ ।
યદેવ ગગનં શાન્તં શૂન્યં વિદ્ધિ તદેવ તત્ ॥ ૪૯॥

કેશોણ્ડ્રકાદયો વ્યોમ્નિ યથા સદસદાત્મકાઃ ।
દ્વિતામિવાગતા ભાન્તિ પરે બુદ્ધ્યાદયસ્તથા ॥ ૫૦॥

તથા બુદ્ધ્યાદિ દેહાદિ વેદનાદિ પરાપરે ।
અનેકાન્યપ્યનન્યાનિ શૂન્યત્વાનિ યથાંબરે ॥ ૫૧॥

સુષુપ્તાદ્વિશતઃ સ્વપ્નમેકનિદ્રાત્મનો યથા ।
સર્ગસ્થસ્યાપિ ન દ્વિત્વં નૈકત્વં બ્રહ્મણસ્તથા ॥ ૫૨॥

એવમેવ કચત્યચ્છા છાયેયં સ્વા મહાચિતેઃ ।
ન ચ કિઞ્ચન નામાઙ્ગ કચત્યચ્છૈવમાસ્થિતા ॥ ૫૩॥

ચિદ્વ્યોમ્નિ હિ ચિદાકાશમેવ સ્વમમલં વપુઃ ।
ચેત્યં દૃશ્યમિવાભાતિ સ્વપ્નેષ્વિવ યથાસ્થિતમ્ ॥ ૫૪॥

અન્યથાનુપપત્ત્યાર્થકારણાભાવતઃ સ્વતઃ ।
ચિદ્વ્યોમાત્માનમેવાદૌ દૃશ્યમિત્યેવ પશ્યતિ ॥ ૫૫॥

સર્ગાદાવેવ ખાત્મૈવ દૃશ્યં ભાતિ નિરાકૃતિ ।
સંભ્રમઃ સ્વપ્નસઙ્કલ્પમિથ્યાજ્ઞાનેષ્વિવાભિતઃ ॥ ૫૬॥

સ્વપ્નવત્તચ્ચ નિર્ધર્મ મનાગપિ ન ભિદ્યતે ।
વિકાર્યપિ સધર્માપિ ચિદ્વ્યોમ્નો વસ્તુનો મલાત્ ॥ ૫૭॥

તત્સ્વપ્નનગરાકારં સધર્માપ્યસધર્મકમ્ ।
શિવાદનન્યમેવેત્થં સ્થિતમેવ નિરન્તરમ્ ॥ ૫૮॥

દૃશ્યં સ્વપ્નાદ્રિવત્સ્વચ્છં મનાગપિ ન ભિદ્યતે ।
તસ્માચ્ચિદ્વ્યોમ ચિદ્વ્યોમ્નઃ શૂન્યત્વં ગગનાદિવ ॥ ૫૯॥

યદેવ તત્પરં બ્રહ્મ સર્વરૂપવિવર્જિતમ્ ।
તદેવેદં તથાભૂતમેવ સર્ગતયા સ્થિતમ્ ॥ ૬૦ ।
સ્વપ્નેઽનુભૂયતે ચૈતત્સ્વપ્ને હ્યાત્મૈવ ભાસતે ।
પુરાદિત્વેન ન તુ સત્પુરાદિરચિતં તદા ॥ ૬૧॥

સ્વપ્ને ચ પ્રત્યભિજ્ઞાયાઃ સંસ્કારસ્ય સ્મૃતેસ્તથા ।
ન સત્તા તદિદં દૃષ્ટમિત્યર્થસ્યાત્યસંભવાત્ ॥ ૬૨॥

તસ્માદેતત્ત્રયં ત્યક્ત્વા યદ્ભાનં બ્રહ્મસંવિદઃ ।
તસ્ય દૃષ્ટાર્થસાદૃશ્યાન્મૂઢૈઃ સ્મૃત્યાદિતોહિતા ॥ ૬૩॥

યથા યત્રૈવ લહરી વારિણ્યેતિ પુનઃ પુનઃ ।
તત્રૈવેતિ તથા તદ્વદનન્યા ખે પરે જગત્ ॥ ૬૪॥

વિધયઃ પ્રતિષેધાશ્ચ સર્વ એવ સદૈવ ચ ।
વિભક્તાશ્ચ વિમિશ્રાશ્ચ પરે સન્તિ ન સન્તિ ચ ॥ ૬૫॥

તસ્માત્સદ્બ્રહ્મ સર્વાત્મ કિમિવાત્ર ન વિદ્યતે ।
સૈવ સત્તૈવ સર્વાત્મ ચૈતદપ્યેતદાત્મકમ્ ॥ ૬૬॥

ભ્રાન્તસ્ય ભ્રમણં ભૂમેર્ન ભૂભ્રાન્તૈવ વા ગણૈઃ ।
ન શામ્યતિ જ્ઞાતુરપિ તથાભ્યાસં વિનાત્ર દૃક્ ॥ ૬૭॥

શાસ્ત્રસ્યાસ્ય તુ યન્નામ વાદનં તદ્વિનાપરઃ ।
અભ્યાસો દૃશ્યસંશાન્ત્યૈ ન ભૂતો ન ભવિષ્યતિ ॥ ૬૮॥

ન જીવન્નમૃતં ચિત્તં રોધમાયાતિ સંસૃતેઃ ।
અવિનાભાવિદેહત્વાદ્બોધાત્ત્વેતન્ન પશ્યતિ ॥ ૬૯॥

સર્વદૈવાવિનાભાવિ ચિત્તં દૃશ્યશરીરયોઃ ।
ઇહ ચામુત્ર ચૈતસ્ય બોધાન્તે શામ્યતઃ સ્વયમ્ ॥ ૭૦॥

ચિત્તદૃશ્યશરીરાણિ ત્રીણિ શામ્યન્તિ બોધતઃ ।
પવનસ્પન્દસૈન્યાનિ કારણાભાવતો યથા ॥ ૭૧॥

કારણં મૌર્ખ્યમેવાસ્ય તચ્ચાસ્માદેવ શાસ્ત્રતઃ ।
કિઞ્ચિત્સંસ્કૃતબુદ્ધીનાં વાચિતાદેવ શામ્યતિ ॥ ૭૨॥

અબુદ્ધમુત્તરગ્રન્થાત્પૂર્વં પૂર્વં હિ બુધ્યતે ।
ગ્રન્થં પદપદાર્થજ્ઞઃ ખેદવાન્ન નિવર્તતે ॥ ૭૩॥

ઉપાયમિદમેવાતો વિદ્ધિ શાસ્ત્રં ભ્રમક્ષયે ।
અનન્યસાધારણતાં ગતમિત્યનુભૂયતે ॥ ૭૪॥

તસ્માદસ્માન્મહાશાસ્ત્રાદ્યથાશક્તિ વિચારયેત્ ।
ભાગૌ દ્વૌ ભાગમેકં વા તેન દુઃખક્ષયો ભવેત્ ॥ ૭૫॥

આરુષેયમિદમિતિ પ્રમાદાચ્ચેન્ન રોચતે ।
તદન્યદાત્મવિજ્ઞાનશાસ્ત્રં કિઞ્ચિદ્વિચારયેત્ ॥ ૭૬॥

અનર્થેનાવિચારેણ વયઃ કુર્યાન્ન ભસ્મસાત્ ।
બોધેન જ્ઞાનસારેણ દૃશ્યં કર્તવ્યમાત્મસાત્ ॥ ૭૭॥

આયુષઃ ક્ષણ એકોઽપિ સર્વરત્નૈર્ન લભ્યતે ।
નીયતે તદ્વૃથા યેન પ્રમાદઃ સુમહાનહો ॥ ૭૮॥

અનુભૂતમપિ ચ નો સદૃશ્યમિદં દ્રષ્ટૃસહિતમપિ ।
સ્વપ્નનિજમરણબાન્ધવરોદનમિવ સદિવ કચિતમપિ ॥ ૭૯॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ પરમાર્થગીતાસુ

અદ્વૈતયુક્તિર્નામ પઞ્ચસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૭૫॥ -૩-

---

॥ અથ પઞ્ચમોઽધ્યાયઃ ॥

॥ સત્યવર્ણનમ્ ॥

શ્રીરામ ઉવાચ ।
અકારણકમેવેદં જગદ્બ્રહ્મ પરાત્પદાત્ ।
યદિ પ્રવર્તતે નામ સ્વપ્નસઙ્કલ્પનાદિવત્ ॥ ૧॥

તદકારણતઃ સિદ્ધેઃ સંભવેઽન્યદકારણમ્ ।
કથં ન જાયતે વસ્તુ ક્વચિત્કિઞ્ચિત્કદાચન ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
યદ્યથા કલ્પિતં યેન સ સમ્પશ્યતિ તત્તથા ।
કલ્પનૈવાન્યથા ન સ્યાત્તાદૃક્કારણવિચ્યુતેઃ ॥ ૩॥

યથેદં કલ્પિતં દૃશ્યં મનસા યેન તત્તથા ।
વેત્ત્યસૌ યાદૃગન્યેન કલ્પિતં વેત્ત્યસૌ તથા ॥ ૪॥

કલ્પનાકલ્પનાત્મૈકં તચ્ચ બ્રહ્મ સ્વભાવતઃ ।
કલ્પનાત્મેદૃશં જન્તુર્યથા કેશનખાદિમાન્ ॥ ૫॥

અકારણપદાર્થત્વં સકારણપદાર્થતા ।
બ્રહ્મણિ દ્વયમપ્યસ્તિ સર્વશક્ત્યાત્મ તદ્યતઃ ॥ ૬॥

યતઃ સ્યાદ્બ્રહ્મણસ્ત્વન્યત્ક્વચિત્કિઞ્ચિત્કદાચન ।
તત્કારણવિકલ્પેન સંયોગસ્તસ્ય યુજ્યતે ॥ ૭॥

યત્ર સર્વમનાદ્યન્તં નાનાનાનાત્મ ભાસતે ।
બ્રહ્મૈવ શાન્તમેકાત્મ તત્ર કિં કસ્ય કારણમ્ ॥ ૮॥

નેહ પ્રવર્તતે કિઞ્ચિન્ન ચ નામ નિવર્તતે ।
સ્થિતમેકમનાદ્યન્તં બ્રહ્મૈવ બ્રહ્મ ખાત્મકમ્ ॥ ૯॥

કિં કસ્ય કારણં કેન કિમર્થં ભવતુ ક્વ વા ।
કિં કસ્ય કારણં કેન કિમર્થં માસ્તુ વા ક્વચિત્ ॥ ૧૦॥

નેહ શૂન્યં ન વા શૂન્યં ન સન્નાસન્ન મધ્યતા ।
વિદ્યતે ન મહાશૂન્યે ન નેતિ ન ન નેતિ ચ ॥ ૧૧॥

ઇદં ન કિઞ્ચિત્કિઞ્ચિદ્વા યન્નામાસ્ત્યથ નાસ્તિ વા ।
સર્વં બ્રહ્મૈવ તદ્વિદ્ધિ યત્તથૈવાતથૈવ તત્ ॥ ૧૨॥

શ્રીરામ ઉવાચ ।
અતજ્જ્ઞવિષયે બ્રહ્મન્કાર્યે કારણસંભવે ।
કિમકારણતાત્મ સ્યાત્કથં વેતિ વદ પ્રભો ॥ ૧૩॥

વસિષ્ઠ ઉવાચ ।
અતજ્જ્ઞો નામ નાસ્ત્યેવ તાવત્તજ્જ્ઞજનં પ્રતિ ।
અસતો વ્યોમવૃક્ષસ્ય વિચારઃ કીદૃશસ્તતઃ ॥ ૧૪॥

એકબોધમયાઃ શાન્તવિજ્ઞાનઘનરૂપિણઃ ।
તજ્જ્ઞાસ્તેષામસદ્રૂપે કથમર્થે વિચારણા ॥ ૧૫॥

અતજ્જ્ઞત્વં ચ બોધેઽન્તરવભાતિ તદઙ્ગતા ।
ગતે સ્વપ્નસુષુપ્તેઽન્તરિવ નિદ્રાત્મ કેવલમ્ ॥ ૧૬॥

તથાપ્યભ્યુપગમ્યાપિ મૂર્ખનિશ્ચય ઉચ્યતે ।
પ્રયેદમણુ સર્વાત્મ યસ્માદ્બ્રહ્મ નિરામયમ્ ॥ ૧૭॥

સન્ત્યકારણકા એવ સન્તિ કારણજાસ્તથા ।
ભાવાઃ સંવિદ્યથા યસ્માત્કલ્પ્યતે લભ્યતે તથા ॥ ૧૮॥

સર્વકારણસંશાન્તૌ સર્વાનુભવશાલિનામ્ ।
સર્ગસ્ય કારણં નાસ્તિ તેન સર્ગસ્ત્વકારણઃ ॥ ૧૯॥

હૃદયઙ્ગમતાત્યક્તમીશ્વરાદિ પ્રકલ્પ્યતે ।
યદત્ર કિઞ્ચિદ્દુઃસ્વાદુ વ્યર્થં વાગ્જાલમેવ તત્ ॥ ૨૦॥

અન્યથાનુપપત્ત્યૈવ સ્વપ્નાભાકલનાદૃતે ।
સ્થૂલાકારાત્મિકા કાચિન્નાસ્તિ દૃશ્યસ્ય દૃશ્યતા ॥ ૨૧॥

સ્વપ્નપૃથ્વ્યાદ્યનુભવે કિમબુદ્ધસ્ય કારણમ્ ।
ચિત્સ્વભાવાદૃતે બ્રૂહિ સ્વપ્નાર્થો નામ કીદૃશઃ ॥ ૨૨॥

સ્વપ્નાર્થો હ્યપરિજ્ઞાતો મહામોહભરપ્રદઃ ।
પરિજ્ઞાતો ન મોહાય યથા સર્ગાસ્તથૈવ ચ ॥ ૨૩॥

શુષ્કતર્કહઠાવેશાદ્યદ્વાપ્યનુભવોજ્ઝિતમ્ ।

કલ્પ્યતે કારણં કિઞ્ચિત્સા મૌર્ખ્યાભિનિવેશિતા ॥ ૨૪॥

અગ્નેરૌષ્ણ્યમપાં શૈત્યં પ્રાકાશ્યં સર્વતેજસામ્ ।
સ્વભાવો વાખિલાર્થાનાં કિમબુદ્ધસ્ય કારણમ્ ॥ ૨૫॥

કિં ધ્યાતૃશતલબ્ધસ્ય ધ્યેયસ્યૈકસ્ય કારણમ્ ।
કિં ચ ગન્ધર્વનગરે પુરે ભિત્તિષુ કારણમ્ ॥ ૨૬॥

ધર્માધમુત્રામૂર્તત્વાન્મૂર્તે દેહે ન કારણમ્ ।
દેહસ્ય કારણં કિં સ્યાત્તત્ર સર્ગાદિભોગિનઃ ॥ ૨૭॥

ભિત્ત્યભિત્ત્યાદિરૂપાણાં જ્ઞાનસ્ય જ્ઞાનવાદિનઃ ।
કિં કારણમનન્તાનામુત્પન્નધ્વંસિનાં મુહુઃ ॥ ૨૮॥

સ્વભાવસ્ય સ્વભાવોઽસૌ કિલ કારણમિત્યપિ ।
યદુચ્યતે સ્વભાવસ્ય સા પર્યાયોક્તિકલ્પતા ॥ ૨૯॥

તસ્માદકારણા ભ્રાન્તિર્ભાવા ભાન્તિ ચ કારણમ્ ।
અજ્ઞે જ્ઞે ત્વખિલં કાર્યં કારણાદ્ભવતિ સ્થિતમ્ ॥ ૩૦॥

યદ્વત્સ્વપ્નપરિજ્ઞાનાત્સ્વપ્ને દ્રવ્યાપહારિભિઃ ।
ન દુઃખાકરણં તદ્વજ્જીવિતં તત્ત્વદર્શનાત્ ॥ ૩૧॥

સર્ગાદાવેવ નોત્પન્નં દૃશ્યં ચિદ્વગનં ત્વિદમ્ ।
સ્વરૂપં સ્વપ્નવદ્ભાતિ નાન્યદત્રોપપદ્યતે ॥ ૩૨॥

અન્યા ન કાચિત્કલના દૃશ્યતે સોપપત્તિકા ।
અસ્માન્ન્યાયાદૃતે કસ્માદ્બ્રહ્મૈવૈષાનુભૂતિભૂઃ ॥ ૩૩॥

ઊર્મ્યાવર્તદ્રવત્વાદિ શુદ્ધે જલઘને યથા ।
તથેદં સર્ગપર્યાયં બ્રહ્મણિ બ્રહ્મ ભાસતે ॥ ૩૪॥

સ્પન્દાવર્તવિવર્તાદિ નિર્મલે પવને યથા ।
તથાયં બ્રહ્મપવને સર્ગસ્પન્દોઽવભાસતે ॥ ૩૫॥

યથાનન્તત્વસૌષિર્યશૂન્યત્વાદિ મહાંબરે ।
સ સન્નાસન્નબોધાત્મ તથા સર્ગઃ પરાપરઃ ॥ ૩૬॥

એષુ નિદ્રાદિકેષ્વેતે સૂપલબ્ધા અપિ સ્ફુટમ્ ।
ભાવા અસન્મયા એવમેતેઽનન્યાત્મકા યતઃ ॥ ૩૭॥

સર્ગપ્રલયસંસ્થાનાન્યેવમાત્મનિ ચિદ્ઘને ।
સૌમ્યે સ્વપ્નસુષુપ્તાભા શુદ્ધે નિદ્રાઘને યથા ॥ ૩૮॥

સ્વપ્નાત્સ્વપ્નાન્તરાણ્યાસ્તે નિદ્રાયાં માનવો યથા ।
સર્ગાત્સર્ગાન્તરાણ્યાસ્તે સ્વસત્તાયામજસ્તથા ॥ ૩૯॥

પૃથ્વાદિરહિતોઽપ્યેષ બ્રહ્માકાશો નિરામયઃ ।
અતદ્વાંસ્તદ્વદાભાતિ યથા સ્વપ્નાનુભૂતિષુ ॥ ૪૦॥

સ્થિતા યથાસ્યાં પશ્યન્તાં શબ્દા ઘટપટાદયઃ ।
જાતાજાતાઃ સ્થિતાઃ સર્ગાસ્તથાનન્યે મહાચિતિ ॥ ૪૧॥

પશ્યન્તામેવ પશ્યન્તી યથા ભાતિ તથૈવ ચ ।
યથા શબ્દાસ્તથા સર્ગાશ્ચિતૈવ ચિતિચિન્મયઃ ॥ ૪૨॥

કિં શાસ્ત્રકં તત્ર કથાવિચારૈ-
    ર્નિર્વાસનં જીવિતમેવ મોક્ષઃ ।
સર્ગે ત્વસત્યેવપ્રકારણત્વા-
    ત્સત્યેવ નાસ્ત્યેવ ન નામ કાચિત્ ॥ ૪૩॥

એષા ચ સિદ્ધેહ હિ વાસનેતિ
    સા બોધસત્તૈવ નિરન્તરૈકા ।
નાનાત્વનાનારહિતૈવ ભાતિ
    સ્વપ્ને ચિદેવેહ પુરાદિરૂપા ॥ ૪૪॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ સત્યવર્ણનં
નામ સપ્તસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૭૭॥ -૫-

---

॥ અથ ષષ્ઠઃ સર્ગઃ ॥

॥ ઐન્દવોપાખ્યાનમ્ ॥

શ્રીરામ ઉવાચ ।
પદાર્થા દ્વિવિધાઃ સન્તિ મૂર્તામૂર્તા જગત્ત્રયે ।
યત્ર સપ્રતિઘાઃ કેચિત્કેચિદપ્રતિઘા અપિ ॥ ૧॥

તાનિહાપ્રતિઘાનાઢુર્નાન્યોન્યં વેલ્લયન્તિ યે ।

તાંશ્ચ સપ્રતિઘાનાહુરન્યોન્યં વેલ્લયન્તિ યે ॥ ૨॥

ઇહ સપ્રતિઘાનં તુ દૃષ્ટમન્યોન્યવેલ્લનમ્ ।
નત્વપ્રતિઘરૂપાણાં કેષાઞ્ચિદપિ કિઞ્ચન ॥ ૩॥

તત્ર સંવેદનં નામ યદિદં ચન્દ્રમણ્ડલે ।
ઇતઃ પતત્યપ્રતિઘં તત્સર્વેણાનુભૂયતે ॥ ૪॥

અર્ધપ્રબુદ્ધસઙ્કલ્પવિકલ્પાદ્વૈતકલ્પિતમ્ ।
વદામ્યભ્યુપગમ્યેદં ન તુ બોધદશાસ્થિતમ્ ॥ ૫॥

કઃ પ્રાણમારુતઃ ક્ષોભં જનયત્યાશયસ્થિતઃ ।
પ્રવેશનિર્ગમભયં કથં વા વદ મે પ્રભો ॥ ૬॥

કથમપ્રતિઘં નામ વેદનં પ્રતિઘાત્મકમ્ ।
ઇમં દેહં ચાલયતિ ભારં ભારહરો યથા ॥ ૭॥

યદિ સપ્રતિઘં વસ્તુ વેલ્લત્યપ્રતિઘાત્મકમ્ ।
કથં સંવિત્તિમાત્રેણ પુંસઃ શૈલો ન વલ્ગતિ ॥ ૮॥

વસિષ્ઠ ઉવાચ ।
વિકાસમથ સઙ્કોચમત્ર નાલી હૃદિ સ્થિતા ।
યદા યાતિ તદા પ્રાણશ્છેદૈરાયાતિ યાતિ ચ ॥ ૯॥

બાહ્યોપસ્કરભસ્રાયાં યથાકાશાસ્પદાત્મકઃ ।
વાયુર્યાત્યપિ ચાયાતિ તથાત્ર સ્પન્દનં હૃદિ ॥ ૧૦॥

શ્રીરામ ઉવાચ ।
બહિર્ભસ્રામયસ્કારઃ સઙ્કોચનવિકાસનૈઃ ।
યોજયત્યાન્તરં નાડીં કશ્ચાલયતિ ચાલકઃ ॥ ૧૧॥

શતં કથં ભવેદેકં કથમેકં શતં ભવેત્ ।
કથં સચેતના એતે કાષ્ઠલોષ્ટૂપલાદયઃ॥ ૧૨॥

કસ્માન્ન સ્થાવરં વસ્તુ પ્રસ્પન્દ્યપિ ચમત્કૃતમ્ ।
વસ્તુ જઙ્ગમમેવેહ સ્પન્દિમાત્રેવ કિં વદ ॥ ૧૩॥

વસિષ્ઠ ઉવાચ ।
અન્તઃસંવેદનં નામ ચાલયત્યાન્ત્રવેષ્ટનમ્ ।
બહિર્ભસ્રામયસ્કાર ઇવ લોકેઽનુચેષ્ટનમ્ ॥ ૧૪॥

શ્રીરામ ઉવાચ ।
વાય્વન્ત્રાદિશરીરસ્થં સર્વં સપ્રતિઘં મુને ।
કથમપ્રતિઘા સંવિચ્ચાલયેદિતિ મે વદ ॥ ૧૫॥

સંવિદપ્રતિઘાકારા યદિ સપ્રતિઘાત્મકમ્ ।
ચાલયેદચલિપ્યત્તદદૂરમમ્ભો યદિચ્છયા ॥ ૧૬॥

સપ્રતિઘાપ્રતિઘયોર્મિથો યદિ પદાર્થયોઃ ।
વેલ્લનં સ્યાત્તદિચ્છૈવ કર્તૃકર્મેન્દ્રિયૈઃ ક્વ કિમ્ ॥ ૧૭॥

સપ્રતિઘાપ્રતિઘયોઃ શેષો નાસ્તિ બહિર્યથા ।
તથૈવાન્તરહં મન્યે શેષં કથય મે મુને ॥ ૧૮॥

અન્તઃસ્વયં યોગિના વા યથૈતદનુભૂયતે ।
અમૂર્તસ્યૈવ મૂર્તેન વેલ્લનં તદ્વદાશુ મે ॥ ૧૯॥

વસિષ્ઠ ઉવાચ ।
સર્વસન્દેહવૃક્ષાણાં મૂલકાષમિદં વચઃ ।
સર્વૈકતાનુભૂત્યર્થં શ‍ૃણુ શ્રવણભૂષણમ્ ॥ ૨૦॥

નેહ કિઞ્ચિન્ન નામાસ્તિ વસ્તુ સપ્રતિઘં ક્વચિત્ ।
સર્વદા સર્વમેવેદં શાન્તમપ્રતિઘં તતમ્ ॥ ૨૧॥

શુદ્ધં સંવિન્મયં સર્વં શાન્તમપ્રતિઘાત્મકમ્ ।
પદાર્થજાતં પૃથ્વ્યાદિ સ્વપ્નસઙ્કલ્પયોરિવ ॥ ૨૨॥

આદાવન્તે ચ નાસ્તીદં કારણાભાવતોઽખિલમ્ ।
ભ્રાન્ત્યાત્મા વર્તમાનાપિ ભાતિ ચિત્સ્વપ્નગા યથા ॥ ૨૩॥

દ્યૌઃ ક્ષમા વાયુરાકાશં પર્વતાઃ સરિતો દિશઃ ।
મહતા કારણૌઘેન બોધમપ્રતિઘં વિદુઃ ॥ ૨૪॥

અન્તઃકરણભૂતાદિ મૃત્કાષ્ઠદૃષદાદિ વા ।
સર્વં શૂન્યમશૂન્યં ચ ચેતનં વિદ્ધિ નેતરત્ ॥ ૨૫॥

તત્રૈવમૈન્દવાખ્યાનં શ‍ૃણુ શ્રવણભૂષણમ્ ।
મયા ચ પૂર્વમુક્તં તત્કિઞ્ચાન્યદભિવર્ણ્યતે ॥ ૨૬॥

તથાપિ વર્તમાનોક્તપ્રશ્નબોધાય તચ્છૃણુ ।
યથેદં સર્વમદ્યાદિ ચિદિત્યેવ તુ ભોત્સ્યતે ॥ ૨૭ ।

કસ્મિંશ્ચિત્પ્રાક્તનેનૈવ જગજ્જાલેઽભવદ્દ્વિજઃ ।
તપોવેદક્રિયાધારો બ્રહ્મન્નિન્દુરિતિ સ્મૃતઃ ॥ ૨૮॥

દશ તસ્યાભવન્પુત્રા જગતો દિક્તટા ઇવ ।
મહાશયા મહાત્માનો મહતામાસ્પદં સતામ્ ॥ ૨૯॥

સ તેષાં કાલવશતઃ પિતાન્તર્ધિમુપાયયૌ ।
દશાનાં ભગવાન્રુદ્ર એકાદશ ઇવ ક્ષયે ॥ ૩૦॥

તસ્યાનુગમનં ચક્રે ભાર્યા વૈધવ્યભીતિભિઃ ।
અનુરક્તા દિનસ્યેવ સન્ધ્યા તારાવિલોચના ॥ ૩૧॥

તયોસ્તે તનયા દુઃખકલિતા વિપિનં ગતાઃ ।
કૃતૌર્ધ્વદેહિકાસ્ત્યક્ત્વા વ્યવહારં સમાધયે ॥ ૩૨॥

ધારણાનાં સમસ્તાનાં કા સ્યાદુત્તમસિદ્ધિદા ।
ધારણા યન્મયાઃ સન્તઃ સ્યામઃ સર્વેશ્વરા વયમ્ ॥ ૩૩॥

ઇતિ તે તત્ર સઞ્ચિન્ત્ય બદ્ધપદ્માસના દશ ।
ઇદં સઞ્ચિન્તયામાસુર્નિર્વિઘ્ને કન્દરોદરે ॥ ૩૪॥

પદ્મજાધિષ્ઠિતાશેષજગદ્ધારણયા સ્થિતાઃ ।
ભવામ પદ્મજોપેતં જગદ્રૂપમવિઘ્નતઃ ॥ ૩૫॥

ઇતિ સઞ્ચિન્ત્ય સબ્રહ્મ જગદ્ધારણયા ચિરમ્ ।
નિમીલિતદૃશસ્તસ્થુસ્તે ચિત્રરચિતા ઇવ ॥ ૩૬॥

અથૈતદ્ધારણાબદ્ધચિત્તાસ્તે તાવદચ્યુતાઃ ।
આસન્માસાન્દશાષ્ટૌ ચ યાવત્તે તત્ર દેહકાઃ ॥ ૩૭॥

શુષ્કાઃ કઙ્કાલતાં યાતાઃ ક્રવ્યાદૈશ્ચર્વિતાઙ્ગકાઃ ।
નાશમભ્યાયયુસ્તત્ર છાયાભાગા ઇઅવાતપૈઃ ॥ ૩૮॥

અહં બ્રહ્મા જગચ્ચેદં સર્ગોઽયં ભુવનાન્વિતઃ ।
ઇતિ સમ્પશ્યતાં તેષાં દીર્ઘકાલોઽભ્યવર્તત ॥ ૩૯॥

તાનિ ચિત્તાન્યદેહાનિ દશૈકધ્યાનતસ્તતઃ ।
સમ્પન્નાનિ જગન્ત્યેવ દશ દેહાનિ વૈ પૃથક્ ॥ ૪૦॥

ઇતિ તેષાં ચિદિચ્છાસાસમ્પન્ના સકલં જગત્ ।
અત્યન્તસ્વચ્છરૂપૈવ સ્થિતા ચાકારવર્જિતા ॥ ૪૧॥

સંવિન્મયત્વાજ્જગતાં તેષાં ભૂમ્યચલાદિ તત્ ।
સર્વં ચિદાત્મકં વિદ્ધિ નો ચેદન્યત્કિમુચ્યતામ્ ॥ ૪૨॥

કિલયત્ત્રિજગજ્જાલં તેષાં કિમાત્મતત્તથા ।
સંવિદાકાશશૂન્યત્વમાત્રમેવેતરન્ન તત્ ॥ ૪૩॥

વિદ્યતે ન યથા કિઞ્ચિત્તરઙ્ગઃ સલિલાદૃતે ।
સંવિત્તત્વાદૃતે તદ્વદ્વિદ્યતે ચલનાદિકમ્ ॥ ૪૪॥

ઐન્દવાનિ યથૈતાનિ ચિન્મયાનિ જગન્તિ ખે ।
તથા ચિન્મયમેતેષુ કાષ્ઠલોષ્ટોપલાદ્યપિ ॥ ૪૫॥

યથૈવૈન્દવસઙ્કલ્પાસ્તે જગત્ત્વમુપાગતાઃ ।
તથૈવાબ્જજસઙ્કલ્પો જગત્ત્વમયમાગતઃ ॥ ૪૬॥

તસ્માદિહેમે ગિરયો વસુધાપાદપા ઘનાઃ ।
મહાભૂતાનિ સર્વં ચ ચિન્માત્રમયમાતતમ્ ॥ ૪૭॥

ચિદ્વૃક્ષાશ્ચિન્મહી ચિદ્દ્યૌશ્ચિદાકાશં ચિદદ્રયઃ ।
નાચિત્ક્વચિત્સંભવતિ તેષ્વૈન્દવજગત્સ્વિવ ॥ ૪૮॥

ચિન્માત્રખકુલાલેન સ્વદેહચલચક્રકે ।
સ્વશરીરમૃદા સર્ગઃ કુતોઽયં ક્રિયતેઽનિશમ્ ॥ ૪૯॥

સઙ્કલ્પનિર્મિતે સર્ગે દૃષદશ્ચેન્નચેતનાઃ ।
તદત્ર લોષ્ટશૈલાદિ કિમેતદિતિ કથ્યતામ્ ॥ ૫૦॥

કલનસ્મૃતિસંસ્કારા દધત્યર્થં ચ નોદરે ।
પ્રાઝ્મૃષ્ટં કલ્પનાદીનામન્યૈવાર્થકલાવતામ્ ॥ ૫૧॥

તદ્ધામસંવિદો નામ્નિ મણિરાશૌ મણિર્યથા ।
સર્વાત્મનિ તથા ચિત્તે કશ્ચિદર્થ ઉદેત્યલમ્ ॥ ૫૨॥

અકાર્યકરણસ્યાર્થો ન ભિન્નો બ્રહ્મણઃ ક્વચિત્ ।
સ્વભાવ ઇતિ તેનેદં સર્વં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૫૩॥

યથાપ્રવૃત્તં ચિદ્વારિ વહત્યાવર્તતેવ નૌ ।
સ્વયત્નેનાતિતીવ્રેણ પરાત્મીયાત્મના વિના ॥ ૫૪॥

પદ્મલીલા જગદિવ પ્રકચન્તિ જગન્તિ યત્ ।

ચિન્માત્રાદ્બ્રહ્મણઃ સ્વસ્માદન્યાનિ ન મનાગપિ ॥ ૫૫॥

અજાત્માનિરુદ્ધં ચ સન્માત્રં બ્રહ્મ ખાત્મકમ્ ।
શાન્તં સદસતોર્મધ્યં ચિદ્ભામાત્રમિદં જગત્ ॥ ૫૬॥

યત્સંવિન્મયમદ્યાદિસઙ્કલ્પં જગતિ સ્થિતમ્ ।
તદસંવિન્મયમિતિ વક્તાઽજ્ઞો જ્ઞૈર્વિહસ્યતે ॥ ૫૭॥

જગન્ત્યાત્મેવ સઙ્કલ્પમયાન્યેતાનિ વેત્તિ ખે ।
ખાત્મકાનિ તથેદં ચ બ્રહ્મ સઙ્કલ્પજં જગત્ ॥ ૫૮॥

યાવદ્યાવદિયં દૃષ્ટિઃ શીઘ્રં શીઘ્રં વિલોક્યતે ।
તાવત્તાવદિદં દુઃખં શીઘ્રં શીઘ્રં વિલીયતે ॥ ૫૯॥

યાવદ્યાવદિયં દૃષ્ટિઃ પ્રેક્ષ્યતે ન ચિરાચ્ચિતા ।
તાવત્તાવદિદં દુઃખં ભવેત્પ્રતિઘનં ઘનમ્ ॥ ૬૦॥

દીર્ઘદુષ્કૃતમૂઢાનામિમાં દૃષ્ટિમપશ્યતામ્ ।
સંસૃતિર્વજ્રસારેયં ન કદાચિત્પ્રશામ્યતિ ॥ ૬૧॥

નેહાકૃતિર્ન ચ ભવાભવજન્મનાશાઃ
  સત્તા ન ચૈવ ન ચ નામ તથાસ્ત્યસત્તા ।
શાન્તં પરં કચતિ કેવલમાત્મનીત્થં
  બ્રહ્માથવા કચનમપ્યલમત્ર નાસ્તિ ॥ ૬૨॥

આદ્યન્તવર્જિતમલભ્યલતાગ્રમૂલ-
  નિર્માણમૂલપરિવેશમશેષમચ્છમ્ ।
અન્તસ્થનિર્ગગનસર્ગકપુત્રકૌઘં
  નિત્યં સ્થિતં નનુ ઘનં ગતજન્મનાશમ્ ॥ ૬૩॥

સન્માત્રમન્તરહિતાખિલહસ્તજાતં
  પર્યન્તહીનગણનાઙ્ગમમુક્તરૂપમ્ ।
આત્મામ્બરાત્મકમહં ત્વિદમેવ સર્વં
  સુસ્તમ્ભરૂપમજમૌનમલં વિકલ્પૈઃ ॥ ૬૪॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ ઐન્દવો
નામાષ્ટસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૭૮॥ -૬-

॥ અથ સપ્તમઃ સર્ગઃ ॥

॥ બ્રહ્મમયત્વપ્રતિપાદનમ્ ॥

વસિષ્ઠ ઉવાચ ।
એવં ચિન્માત્રમેવૈકં શુદ્ધં સત્ત્વં જગત્ત્રયમ્ ।
સંભવન્તીહ ભૂતાનિ નાજ્ઞાબુદ્ધાનિ કાનિચિત્ ॥ ૧॥

તસ્માત્કુતઃ શરીરાદિ વસ્તુ સપ્રતિઘં કુતઃ ।
યદિદં દૃશ્યતે કિઞ્ચિત્તદપ્રતિઘમાતતમ્ ॥ ૨॥

સ્થિતં ચિદ્વ્યોમ ચિદ્વ્યોમ્નિ શાન્તે શાન્તં સમં સ્થિતમ્ ।
સ્થિતમાકાશમાકાશે જ્ઞપ્તિર્જ્ઞપ્તૌ વિજૃમ્ભતે ॥ ૩॥

સર્વં સંવિન્મયં શાન્તં સત્સ્વપ્નં ઇવ જાગ્રતિ ।
સ્થિતમપ્રતિઘાકારં ક્વાસૌ સપ્રતિઘાં સ્થિતિઃ ॥ ૪॥

ક્વ દેહ અવયવાઃ ક્વાન્ત્રવેષ્ટની ક્વાસ્થિપઞ્જરમ્ ।
વ્યોમેવાપ્રતિઘં વિદ્ધિ દેહં સપ્રતિઘોષમમ્ ॥ ૫॥

સંવિત્કરૌ શિરઃ સંવિત્સંવિદિન્દ્રિયવૃન્દકમ્ ।
શાન્તમપ્રતિઘં સર્વં ન સપ્રતિઘમસ્તિ હિ ॥ ૬॥

બ્રહ્મવ્યોમ્નઃ સ્વપ્નરૂપસ્વભાવત્વાજ્જગત્સ્થિતેઃ ।
ઇદં સર્વં સંભવતિ સહેતુકમહેતુકમ્ ॥ ૭॥

ન કારણં વિના કાર્યં ભવતીત્યુપપદ્યતે ।
યદ્યથા યેન નિર્ણીતં તત્તથા તેન લક્ષ્યતે ॥ ૮॥

કારણેન વિના કાર્યં સદ્વદિત્યુપપદ્યતે ।
યથા ભાવિતમેવાર્થં સંવિદાપ્નોત્યસંશયમ્ ॥ ૯॥

યથા સંભવતિ સ્વપ્ને સર્વં સર્વત્ર સર્વથા ।
ચિન્મયત્વાત્તથા જાગ્રત્યસ્તિ સર્વાત્મરૂપતા ॥ ૧૦॥

સર્વાત્મનિ બ્રહ્મપદે નાનાનાત્મનિ સ્થિતા ।
અસ્ત્યકારણકાર્યાણાં સત્તા કારણજાપિ ચ ॥ ૧૧॥

એકઃ સહસ્રં ભવતિ યથા હ્યેતે કિલૈન્દવાઃ ।
પ્રયાતા ભૂતલક્ષત્વં સઙ્કલ્પજગતાં ગણૈઃ ॥ ૧૨॥

સહસ્રમેકં ભવતિ સંવિદાં ચ તથા હિ યત્ ।
સાયુજ્યે ચક્રપાણ્યાદેઃ સર્ગૈરેકં ભવેદ્વપુઃ ॥ ૧૩॥

એક એક ભવત્યબ્ધિઃ સ્રવન્તીનાં શતૈરપિ ।
એક એક ભવેત્કાલ ઋતુસંવત્સરોત્કરૈઃ ॥ ૧૪॥

સંવિદાકાશ એવાયં દેહઃ સ્વપ્ન ઇવોદિતઃ ।
સ્વપ્નાદ્રિવન્નિરાકારઃ સ્વાનુભૂતિસ્ફુટોઽપિ ચ ॥ ૧૫॥

સંવિત્તિરેવાનુભવાત્સૈવાનનુભવાત્મિકા ।
દ્રષ્ટૃદૃશ્યદૃશા ભાતિ ચિદ્વ્યોમૈકમતો જગત્ ॥ ૧૬॥

વેદનાવેદનાત્મૈકં નિદ્રાસ્વપ્નસુષુપ્તવત્ ।
વાતસ્પન્દાવિવાભિન્નૌ ચિદ્વ્યોમૈકમતો જગત્ ॥ ૧૭॥

દ્રષ્ટા દૃશ્યં દર્શનં ચ ચિદ્ભાન પરમાર્થખમ્ ।
શૂન્યસ્વપ્ન ઇવાભાતિ ચિદ્વ્યોમૈકમતો જગત્ ॥ ૧૮॥

જગત્ત્વમસદેવેશે ભ્રાન્ત્યા પ્રથમસર્ગતઃ ।
સ્વપ્ને ભયમિવાશેષં પરિજ્ઞાત પ્રશામ્યતિ ॥ ૧૯॥

એકસ્યાઃ સંવિદઃ સ્વપ્ને યથા ભાનમનેકધા ।
નાનાપદાર્થરૂપેણ સર્ગાદૌ ગગને તથા ॥ ૨૦॥

બહુદીપે ગૃહે ચ્છાયા બહ્વ્યો ભાન્ત્યેકવદ્યથા ।
સર્વશક્તેસ્તથૈવૈકા ભાતિ શક્તિરનેકધા ॥ ૨૧॥

યત્સીકરસ્ફુરણમમ્બુનિધૌ શિવાખ્ય
    વ્યોમ્નીવ વૃક્ષનિકરસ્ફુરણં સ સર્ગઃ ।
વ્યોમ્નેષ વૃક્ષનિકરો વ્યતિરિક્તરૂપો
    બ્રહ્મામ્બુધૌ ન તુ મનાગપિ સર્ગબિન્દુઃ ॥ ૨૨॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
બ્રહ્મમયત્વપ્રતિપાદનં નામૈકોનાશીત્યધિકશતતમઃ
સર્ગઃ ॥ ૧૭૯॥ -૭-

॥ અથ અષ્ટમોઽધ્યાયઃ ॥

॥ તાપસોપાખ્યાનમ્ ॥

શ્રીરામ ઉવાચ ।
ઇમં મે સંશયં છિન્ધિ ભગવન્ભાસ્કરં તમઃ ।
ભુવનસ્યેવ ભાવાનાં સમ્યગ્રૂપાનુભૂતયે ॥ ૧॥

કદાચિદહમેકાગ્રો વિદ્યાગેહે વિપશ્ચિતામ્ ।
સંસદિ સ્થિતવાન્યાવત્તાપસઃ કશ્ચિદાગતઃ ॥ ૨॥

વિદ્વાન્ દ્વિજવરઃ શ્રીમાન્વિદેહજનમણ્ડલાત્ ।
મહાતપાઃ કાન્તિયુતો દુર્વાસા ઇવ દુઃસહઃ ॥ ૩॥

સ પ્રવિશ્યાભિવાદ્યાશુ સભામાભાસ્વરદ્યુતિમ્ ।
ઉપવિશ્યાસને તિષ્ઠન્નસ્માભિરભિવાદિતઃ ॥ ૪॥

વેદાન્તસાઙ્ખ્યસિદ્ધાન્તવાદાન્સંહૃત્ય સત્તમમ્ ।
સુખોપવિષ્ટં વિશ્રાન્તં તમહં પૃષ્ટવાનિદમ્ ॥ ૫॥

દીર્ઘાધ્વના પરિશ્રાન્તઃ સયત્ન ઇવ લક્ષ્યસે ।
વદાદ્ય વદતાં શ્રેષ્ઠ કુત આગમનં કૃતમ્ ॥ ૬॥

બ્રાહ્મણ ઉવાચ ।
એવમેતન્મહાભાગ સુમહાયત્નવાનહમ્ ।
યદર્થમાગતોઽસ્મીહ તસ્યાકર્ણય નિર્ણયમ્ ॥ ૭॥

વૈદેહો નામ દેશોઽસ્તિ સર્વસૌભાગ્યસંયુતઃ ।
સ્વર્ગસ્યાસ્વરસંસ્થસ્ય પ્રતિબિમ્બમિવાવનૌ ॥ ૮॥

તત્રાહં બ્રાહ્મણો જાતઃ પ્રાપ્તવિદ્યશ્ચ સંસ્થિતઃ ।
કુન્દાવદાદન્તત્વાત્કુન્દદન્ત ઇતિ શ્રુતઃ ॥ ૯॥

અથાહં જાતવૈરાગ્યઃ પ્રવિહર્તું પ્રવૃત્તવાન્ ।
દેવદ્વિજમુનીન્દ્રાણાં સંભ્રમાચ્છમશાન્તયે ॥ ૧૦॥

શ્રીપર્વતમખણ્ડેઽહં કદાચિત્પ્રાપ્તવાનહમ્ ।
તત્રાવસં ચિરં કાલં મૃદુ દીર્ઘં તપશ્ચરન્ ॥ ૧૧॥

તત્રાસ્ત્યરણ્યં વિદિતં મુક્તં તૃણવનાદિભિઃ ।

ત્યક્તતેજસ્તમોભ્રાદિભૂમાવિવ નભસ્તલમ્ ॥ ૧૨॥

તત્રાસ્તિ મધ્યે વિટપિ લઘુઃ પેલવપલ્લવઃ ।
સ્થિત એષોઽમ્બરે શૂન્યે મન્દરશ્મિરિવાંશુમાન્ ॥ ૧૩॥

લમ્બતે તસ્ય શાખાયાં પુરુષઃ પાવનાકૃતિઃ ।
ભાનુર્ભાનાવિવ રશ્મિગૃહીતો ગ્રથિતાકૃતિઃ ॥ ૧૪॥

મૌઞ્જદામનિ બદ્ધોર્ધ્વપાદો નિત્યમવાક્શિરાઃ ।
અષ્ઠીલત્વં દધદિવ મહાષ્ઠીલસ્ય શાલ્મલેઃ ॥ ૧૫॥

દૃષ્ટઃ પ્રાપ્તેન તં દેશં સ કદાચિન્મયા પુમાન્ ।
વિચારિતો નિકટતો વક્ષઃસ્થાઞ્જલિસમ્પુટઃ ॥ ૧૬॥

યાવજ્જીવત્યસૌ વિપ્રો નિઃશ્વસિત્યહતાકૃતિઃ ।
શીતવાતાતપસ્પર્શાન્સર્વાન્વેત્તિ ચ કાલજાન્ ॥ ૧૭॥

અનન્તરમસાવેકો નોપચર્યમયા બહૂન્ ।
દિવસાતપખેદેન વિશ્રમ્ભે પાતિતઃ શનૈઃ ॥ ૧૮॥

પૃષ્ટશ્ચ કોઽસિ ભગવન્કિમર્થં દારુણં તપઃ ।
કરોષીદં વિશાલાક્ષ લક્ષ્યાલક્ષ્યાત્મજીવિતઃ ॥ ૧૯॥

અથ તેનોક્તમર્થસ્તે ક ઇવાનેન તાપસ ।
અર્થે નાતિવિચિત્રા હિ ભવન્તીચ્છાઃ શરીરિણામ્ ॥ ૨૦॥

ઇત્યુક્તવાન્પ્રયત્નેન સોઽનુબન્ધેન વૈ મયા ।
યદા પૃષ્ટસ્તદા તેન મમોક્તમિદમુત્તરમ્ ॥ ૨૧॥

મથુરાયામહં જાતો વૃદ્ધિં યાતઃ પિતુર્ગૃહે ।
બાલ્યયૌવનયોર્મધ્યે સ્થિતઃ પદપદાર્થવિત્ ॥ ૨૨॥

સમગ્રસુખસંભારકોશો ભવતિ ભૂમિપઃ ।
ઇત્યહં શ્રુતવાંસ્તત્ર ભોગાર્થી નવયૌવનઃ ॥ ૨૩॥

અથ સપ્તમહાદ્વીપવિસ્તીર્ણાયા ભુવઃ પતિઃ ।
સ્યામિત્યહમુદારાત્મા પરિબિમ્બિતવાંશ્ચિરમ્ ॥ ૨૪॥

ઇત્યર્થેન સમાગત્ય દેશમિત્થમહં સ્થિતઃ ।
અત્ર દ્વાદશવર્ષાણિ સમતીતાનિ માનદ ॥ ૨૫॥

તદકારણમિત્રત્વં ગચ્છેષ્ટં દેશમાશુગઃ ।
અહં ચાભિમતપ્રાપ્તેરિત્થમેવ દૃઢસ્થિતિઃ ॥ ૨૬॥

ઇતિ તેનેહમુક્તઃ સંસ્તમિચ્છં પ્રોક્તવાઞ્છૃણુ ।
આશ્ચર્યશ્રવણે ચેતઃ ખેદમેતિ ન ધીમતઃ ॥ ૨૭॥

સાધો યાવત્તયા પ્રાપ્તો ન નામાભિમતો વરઃ ।
ત્વદ્રક્ષાપરિચર્યાર્થમિહ તાવદહં સ્થિતઃ ॥ ૨૮॥

મયેત્યુક્તે સ પાષાણ મૌનવાનભમચ્છમી ।
નિમીલિતેક્ષણઃ ક્ષીણરૂપસ્ત્વકલનો બહિઃ ॥ ૨૯॥

તથાહં પુરતસ્તસ્ય કાષ્ઠમૌનવતોઽવસમ્ ।
ષણ્માસાન્વિગતોદ્વેગં વેગાન્કાલકૃતાન્સહન્ ॥ ૩૦॥

અર્કબિમ્બાદ્વિનિષ્ક્રમ્ય તત્પ્રદેશાન્તરે સ્થિતમ્ ।
એકદા દૃષ્ટવાનસ્મિ પુરુષં ભાનુભાસ્વરમ્ ॥ ૩૧॥

સ તેન પૂજ્યતે યાવન્મનસા કર્મણા મયા ।
ઉવાચ તાવદ્વચનમમૃતસ્યન્દસુન્દરમ્ ॥ ૩૨॥

શાખાપ્રલમ્બનપર હે બ્રહ્મન્દીર્ઘતાપસ ।
તપઃ સંહર સંહારી ગૃહાણાભિમતં વરમ્ ॥ ૩૩॥

સપ્તાબ્ધિદ્વીપવલયાં પાલયિષ્યસિ મેદિનીમ્ ।
સપ્તવર્ષસહસ્રાણિ દેહેનાનેન ધર્મતઃ ॥ ૩૪॥

એવં સમીહિતં દત્વા સ દ્વિતીયો દિવાકરઃ ।
ગન્તુમસ્તમથાર્કાબ્ધિમવિશત્પ્રોદિતો યતઃ ॥ ૩૫॥

તસ્મિન્યાતે મયા પ્રોક્તં તસ્ય શાખાતપસ્વિનઃ ।
શ્રુતદૃષ્ટાનુભૂતાગ્ર્યવરદસ્ય વિવેકિનઃ ॥ ૩૬॥

સમ્પ્રાપ્તાભિમતં બ્રહ્મંસ્તરુશાખાવલમ્બનમ્ ।
તપસ્ત્યક્ત્વા યથા પ્રાપ્તં વ્યવહારં સમાચર ॥ ૩૭॥

એવમઙ્ગીકૃતવતઃ પાદૌ તસ્ય મયા તતઃ ।
મુક્તૌ વિટપિનસ્તસ્માદાલાનાત્કાલભાવિવ ॥ ૩૮॥

સ્વાતઃ પવિત્રહસ્તોઽસૌ ચક્રે જપ્ત્વાઘમર્ષણમ્ ।
ફલેન પુણ્યલબ્ધેન વિટપાદ્વ્રતપારણમ્ ॥ ૩૯॥

તત્પુણ્યવશતઃ પ્રાપ્તૈઃ સ્વાદુભિસ્તૈસ્તરોઃ ફલૈઃ ।
સમાશ્વસ્તાવસઙ્ક્ષુબ્ધાવાવાં તત્ર દિનત્રયમ્ ॥ ૪૦॥

સપ્તદ્વીપસમુદ્રમુદ્રિતદિશં ભોક્તું સમગ્રાં મહીં
    વિપ્રઃ પાદપલમ્બિતેન વપુષા તપ્ત્વોર્ધ્વપાદસ્તપઃ ।
સમ્પ્રાપ્યાભિમતં વરં દિનકૃતો વિશ્વસ્ય ચાબ્દાં ત્રયં
    સાર્ધં મત્સુહૃદા સ્વમેવ સદનં ગન્તું પ્રવૃત્તોઽભવત્ ॥ ૪૧॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ તાપ્સોપાખ્યાનં
નામાશીત્યધિકશતતમઃ સર્ગઃ ॥ ૧૮૦॥ -૮-

---

॥ અથ નવમોઽધ્યાયઃ ॥

॥ ગૌર્યાશ્રમવર્ણનમ્ ॥

કુન્દદન્ત ઉવાચ ।
આવાસમન્તરે ગન્તું પ્રવૃત્તૌ મુદિતાકૃતી ।
મથુરાનગરીં ચન્દ્રસૂર્યાવિન્દ્રપુરીમિવ ॥ ૧॥

પ્રાપ્ય રોધાભિધં ગ્રામં વિશ્રમ્યામ્રવણાચલે ।
ઉષિતૌ દ્વે દિને તસ્મિન્સાલીસે નગરે સુખમ્ ॥ ૨॥

અધ્વાનન્દિતચિત્તાભ્યામાવાભ્યામતિવાહિતઃ ।
દ્વિતીયેઽહનિ શીતામ્બુસ્નિગ્ધચ્છાયાવનદ્રુમાઃ ॥ ૩॥

નદીતીરલતોન્મુક્તપુષ્પપ્રકરપાણ્ડુરાઃ ।
તરત્તરઙ્ગઝાઙ્કારગાયનાનન્દિતાધ્વગાઃ ॥ ૪॥

સ્નિગ્ધદ્રુમવનચ્છાયરણન્મૃગવિહઙ્ગમાઃ ।
સ્થૂલશાદ્વલશાખાગ્રપ્રોતાવશ્યાયમૌક્તિકાઃ ॥ ૫ ।
જઙ્ગલાદ્રિપુરગ્રામશ્વભ્રાભૂપસ્થલાવનીઃ ।
સમુલ્લઙ્ઘ્ય દિને તસ્મિન્સરિત્સ્રોતઃ સરાંસિ ચ ॥ ૬॥

નીતવન્તૌ નિશામાવાં કદલીકાનને ઘને ।
તુષારશિશિરે શ્રાન્તૌ કદલીદલતલ્પકે ॥ ૭॥

પ્રાપ્તાવાવાં તૃતીયેઽહ્નિ ષણ્ડષણ્ડકમણ્ડિતમ્ ।
જઙ્ગલં જનવિચ્છેદવિભક્તં ખમિવાકૃતમ્ ॥ ૮॥

તત્ર સ પ્રકૃતં માર્ગં પરિત્યજ્ય વનાન્તરમ્ ।
પ્રવિશન્સમુવાચેદમકાર્યકરણં વચઃ ॥ ૯॥

ગચ્છાવોઽત્રાશ્રમે ગૌર્યા મુનિમણ્ડલમણ્ડિતે ।
ભ્રાતરો મે સ્થિતાઃ સપ્ત વનેષ્વેવમિવાર્થિનઃ ॥ ૧૦॥

ભ્રાતરોષ્ટૌ વયમિમે જાતાનેકતયા તયા ।
એકસંવિન્મયા જાતા એકસઙ્કલ્પનિશ્ચયાઃ ॥ ૧૧॥

તેન તેઽપ્યત્ર તપસે સ્વનિશ્ચયસમાશ્રયાઃ ।
સ્થિતા આગત્ય વિવિધૈસ્તપોભિઃ ક્ષપિતૈનસઃ ॥ ૧૨॥

તૈઃ સાર્ધં ભ્રાતૃભિઃ પૂર્વમાગત્યાહમિહાવસમ્ ।
ષણ્માસાનાશ્રમે ગૌર્યાસ્તેન દૃષ્ટો મયૈષ સઃ ॥ ૧૩॥

પુષ્પખણ્ડ તરુચ્છાયા સુપ્તમુગ્ધમૃગાર્ભકઃ ।
પર્ણોટજાગ્રવિશ્રાન્તશુકોદ્ગ્રાહિતશાસ્ત્રદૃક્ ॥ ૧૪॥

તદ્બ્રહ્મલોકસઙ્કાશમેહિ મુન્યાશ્રમં શ્રિયે ।
ગચ્છાવોઽચ્છતરં તત્ર ચેતઃ પુણ્યૈર્ભવિષ્યતિ ॥ ૧૫॥

વિદુષામપિ ધીરાણામપિ તત્ત્વવિદામપિ ।
ત્વરતે હિ મનઃ પુંસામલંબુદ્ધિવિલોકને ॥ ૧૬॥

તેનેત્યુક્તે ચ તાવાવાં પ્રાપ્તૌ મુન્યાશ્રમં ચ તમ્ ।
યાવત્તત્ર મહારણ્યે પશ્યાવશ્રાન્તરૂપિણમ્ ॥ ૧૭॥

ન વૃક્ષં નોટજં કિઞ્ચિન્ન ગુલ્મં ન ચ માનવમ્ ।
ન મુનિં નાર્ભકં નાન્યન્ન વેદિં ન ચ વા દ્વિજમ્ ॥ ૧૮॥

કેવલં શૂન્યમેવાતિ તદરણ્યમનન્તકમ્ ।
તાપોપતપ્તમભિતો ભૂમૌ સ્થિતમિવામ્બરમ્ ॥ ૧૯॥

હા કષ્ટં કિમિદં જાતમિતિ તસ્મિન્વદત્યથ ।
આવાભ્યાં સુચિરં ભ્રાન્ત્વા દૃષ્ટ એકત્ર વૃક્ષકઃ ॥ ૨૦॥

સ્નિગ્ધચ્છવિર્ઘનચ્છાયઃ શીતલોઽમ્બુધરોપમઃ ।
તલે તસ્ય સમાધાને સંસ્થિતો વૃદ્ધતાપસઃ ॥ ૨૧॥

આવામગ્રે મુનેસ્તસ્ય ચ્છાયાયાં શાદ્વલસ્થલે ।
ઉપવિષ્ટૌ ચિરં યાવન્નાસૌ ધ્યાનાન્નિવર્તતે ॥ ૨૨॥

તતશ્ચિરેણ કાલેન મયોદ્વેગેન ચાપલાત્ ।
ઉક્તં મુને પ્રબુધ્યસ્વ ધ્યાનાદિત્યુચ્ચકૈર્વચઃ ॥ ૨૩॥

શબ્દેનોચ્ચૈર્મદીયેન સમ્પ્રબુદ્ધોઽભવન્મુનિઃ ।
સિંહોઽમ્બુદરવેણેવ જૃમ્ભાં કૃત્વાભ્યુવાચ ચ ॥ ૨૪॥

કૌ ભવન્તાવિમૌ સાધૂ ક્વાસૌ ગૌર્યાશ્રમો ગતઃ ।
કેન વાહમિહાનીતઃ કાલોઽયં કશ્ચ વર્તતે ॥ ૨૫॥

તેનેત્યુક્તે મયાપ્યુક્તં ભગવન્વિદ્ધિ ઈદૃશમ્ ।
ન કિઞ્ચિદાવાં બુદ્ધોઽપિ કસ્માજ્જાનાસિ ન સ્વયમ્ ॥ ૨૬॥

ઇતિ શ્રુત્વા સ ભગવાન્પુનર્ધ્યાનમયોઽભવત્ ।
દદર્શોદન્તમખિલમસ્માકં સ્વાત્મનસ્તથા ॥ ૨૭॥

મુહૂર્તમાત્રેણોવાચ પ્રબુધ્ય ધ્યાનતો મુનિઃ ।
શ્રૂયતામિદમાશ્ચર્યમાર્યૌ હિ કાર્યવેદિનૌ ॥ ૨૮॥

યમિમં પશ્યથઃ સાધૂ કદમ્બતરુપુત્રકમ્ ।
મદાસ્પદમરણ્યાન્યાધમ્મિલ્લમિવ પુષ્પિતમ્ ॥ ૨૯॥

કેનાપિ કારણેનાસ્મિન્સતી વાગીશ્વરી સતી ।
અવસદ્દશવર્ષાણિ સમસ્તર્તુનિષેવિતા ॥ ૩૦॥

તદા તેનેહવિસ્તીર્ણમભવદ્વનકાનનમ્ ।
ગૌરિવનમિતિ ખ્યાતં ભૂષિતં કુસુમર્તુભિઃ ॥ ૩૧॥

ભૃઙ્ગાઙ્ગનાજનમનોહરહારિગીત-
    લીલાવિલોલકલકણ્ઠવિહઙ્ગમઙ્ગ ।
પુષ્પામ્બુવાહશતચન્દ્રનભોવિતાનં
    રાજીવરેણુકણકીર્ણદિગન્તરાલમ્ ॥ ૩૨॥

મન્દારકુન્દમકરન્દસુગન્ધિતાશં
    સંસૂચ્છ્વસત્કુસુમરાશિશશાઙ્કનિષ્ઠમ્ ।
સન્તાનકસ્તબકહાસવિકાસકાન્ત-

માામોદિમારુતસમસ્તલતાઙ્ગનૌઘમ્ ॥ ૩૩॥

પુષ્કાકરસ્ય નગરં નવગીતભૃઙ્ગં
ભૃઙ્ગાઙ્ગનાકુસુમખણ્ડકમણ્ડપાઢ્યમ્ ।
ચન્દ્રાંશુજાલપરિકોમલપુષ્પદોલા-
દોલાયમાનસુરસિદ્ધવધૂસમૂહમ્ ॥ ૩૪॥

હારીતહંસશુકકોકિલકોકકાક-
ચક્રાહ્વભાસકલવિહ્રકુલાકુલાઙ્ગમ્ ।
મેરુણ્ડકુક્કુટકપિઞ્જલહેમચૂડ-
રાઢામયૂરબકકલ્પિતકેલિરમ્યમ્ ॥ ૩૫॥

ગન્ધર્વયક્ષસુરસિદ્ધકિરીટઘૃષ્ટ-
પાદાબ્જકર્ણિકકદમ્બસરસ્વતીકમ્ ।
વાતાયનં કનકકોમલચમ્પકૌઘ-
તારામ્બરામ્બુધરપૂરગૃહીતગન્ધમ્ ॥ ૩૬॥

મન્દાનિલસ્ખલિતપલ્લવબાલવલ્લી-
વિન્યાસગુપ્તદિવસાધિપરશ્મિશીતમ્ ।
પીતં કદમ્બકરવીરકનાલિકેર-
તાલીતમાલકુલપુષ્પપરાગપૂરૈઃ ॥ ૩૭॥

કહ્લારકીર્ણકુમુદોત્પલપદ્મખણ્ડ-
વલ્ગચ્ચકોરબકકોકકદમ્બહંસમ્ ।
તાલીસગુગ્ગુલકચન્દનપારિભદ્ર-
ભદ્રદ્રુમોદવિહારિવિચિત્રશક્તિ ॥ ૩૮॥

તસ્મિન્વને ચિરમુવાસ હરાર્ધદેહા
કેનાપિ કારણવશેન ચિરાય ગૌરી ।
ભૂત્વા પ્રસન્નશશિબિમ્બમુખી કદમ્બ-
વાગીશ્વરી શશિકલેવ શિવસ્ય મૂર્ધ્નિ ॥ ૩૯॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ તાપસોપાખ્યાને
ગૌર્યાશ્રમવર્ણનં નામૈકાશીત્યધિકશતતમઃ
સર્ગઃ ॥ ૧૮૧॥ -૯-

॥ અથ દશમોઽધ્યાયઃ ॥

॥ સપ્તદીપેશ્વર ॥

વૃદ્ધતાપસ ઉવાચ ।
તસ્મિન્નેવ કદમ્બેઽસ્મિન્વર્ષાણિ સ્વેચ્છયા દશ ।
સ્થિત્વા ગૌરી જગામાથ હરવામાર્ધમન્દિરમ્ ॥ ૧॥

તત્સ્પર્શામૃતસિક્તોઽયં કદમ્બતરુપુત્રકઃ ।
ઉત્સઙ્ગ ઇવ ચાસીનો ન યાત્યેવ પુરાણતામ્ ॥ ૨॥

તતો ગૌર્યા પ્રયાતાયાં તદ્વનં તાદૃશં મહત્ ।
સામાન્યવનતાં યાતં જનવૃન્દોપજીવિતમ્ ॥ ૩॥

માલવો નામ દેશોઽસ્તિ તત્રાહં પૃથિવીપતિઃ ।
કદાચિત્ત્યક્તરાજ્ય શ્રીર્મુનીનામાશ્રમાન્ભ્રમન્ ॥ ૪॥

ઇમં દેશમનુપ્રાપ્ત ઇહ ચાશ્રમવાસિભિઃ ।
પૂજિતોઽસ્ય કદમ્બસ્ય ધ્યાનનિષ્ઠસ્તલે સ્થિતઃ ॥ ૫॥

કેનચિત્ત્વથ કાલેન ભ્રાતૃભિઃ સપ્તભિઃ સહ ।
ભવાનભ્યાગતઃ પૂર્વં તપોર્થમિમમાશ્રમમ્ ॥ ૬॥

તપસ્વિનોઽષ્ટાવિહ તે તથા નામ તદાવસન્ ।
યથા તપસ્વિનોઽન્યે તે તેષાં માન્યાસ્તપસ્વિનઃ ॥ ૭॥

કાલેનાન્તરમસાવેકઃ શ્રીપર્વતં ગતઃ ।
સ્વામિનં કાર્તિકેયં ચ દ્વિતીયસ્તપસે ગતઃ ॥ ૮॥

વારાણસીં તૃતીયસ્તુ ચતુર્થોઽગાદ્ધિમાચલમ્ ।
ઇહૈવ તે પરે ધીરાશ્ચત્વારોઽન્યે પરં તપન્ ॥ ૯॥

સર્વેષામેવ ચૈતેષાં પ્રત્યેકં ત્વેતદીપ્સિતમ્ ।
યથા સમસ્તદ્વીપાયા ભુવોઽસ્યાઃ સ્યાં મહીપતિઃ ॥ ૧૦॥

અથ સમ્પાદિતં તેષાં સર્વેષામેતદીપ્સિતમ્ ।
તપસ્તુષ્ટાભિરિષ્ટભિર્દેવતાભિર્વરૈઃ ॥ ૧૧॥

તપતસ્તે તતો યાતા ભ્રાતરઃ સદનં નિજમ્ ।
ભૂમૌ ધર્મયુગં ભુક્ત્વા વેધા બ્રહ્મપુરીમિવ ॥ ૧૨॥

તદ્ભવદ્ભ્રાતૃભિર્ભવ્ય વરદાનવિધૌ તદા ।
ઇદં વરોધતા યત્નાત્પ્રાર્થિતાઃ સ્વેષ્ટદેવતાઃ ॥ ૧૩॥

દેવ્યસ્માકમિમે સર્વે સપ્તદ્વીપેશ્વરૌ સ્થિતૌ ।
સત્યાઃ પ્રકૃતયઃ સન્તુ સર્વ આશ્રમવાસિનઃ ॥ ૧૪॥

તમિષ્ટદેવતાસાર્થમુરરીકૃત્ય સાદરમ્ ।
તેષામસ્ત્વેવમિત્યુક્ત્વા જગામાન્તર્દ્ધિમીશ્વરી ॥ ૧૫॥

તે તતઃ સદનં યાતાસ્તેષામાશ્રમવાસિનઃ ।
સર્વ એવ ગતાઃ પશ્ચાદેક એવાસ્મિ નો ગતઃ ॥ ૧૬॥

અહં કેવલમેકાન્તે ધ્યાનૈકગતમાનસઃ ।
વાગીશ્વરીકદમ્બસ્ય તલે તિષ્ઠામિ શૈલવત્ ॥ ૧૭॥

અથ કાલે વહત્યસ્મિન્નૃતુસંવત્સરાત્મનિ ।
ઇઅદં સર્વં વનં છિન્નં જનૈઃ પર્યન્તવાસિભિઃ ॥ ૧૮॥

ઇદં કદમ્બમમ્લાનં જનતાઃ પૂજયન્ત્યલમ્ ।
વાગીશ્વરીગૃહમિતિ માં ચૈવૈકસમાધિગમ્ ॥ ૧૯॥

અથૈનં દેશમાયાતૌ ભવન્તૌ દીર્ઘતાપસૌ ।
એતત્ત્વત્કથિતં સર્વં ધ્યાનદૃષ્ટં મયાખિલમ્ ॥ ૨૦॥

તસ્માદુત્થાય હે સાધૂ ગચ્છતં ગૃહમાગતૌ ।
તત્ર તે ભ્રાતરઃ સર્વે સઙ્ગતા દારબન્ધુભિઃ ॥ ૨૧॥

અષ્ટાનાં ભવતાં ભવ્યં સદને સ્વે ભવિષ્યતિ ।
મહાત્મનાં બ્રહ્મલોકે વસૂનામિવ સઙ્ગમઃ ॥ ૨૨॥

ઇત્યુક્તે તેન સ મયા પૃષ્ટઃ પરમતાપસઃ ।
સન્દેહાદિદમાશ્ચર્યમાર્યાસ્તદ્વર્ણયામ્યહમ્ ॥ ૨૩॥

એકૈવ સપ્તદ્વીપાસ્તિ ભગવન્ભૂરિયં કિલ ।
તુલ્યકાલં ભવન્ત્યષ્ટૌ સપ્તદ્વીપેશ્વરાઃ કથમ્ ॥ ૨૪॥

કદમ્બતાપસ ઉવાચ ।
અસમઞ્જસમેતાવદેવ નો યાવદુચ્યતે ।
ઇદમન્યદસંબદ્ધતરં સંશ્રૂયતાં મમ ॥ ૨૫॥

એતેઽષ્ટૌ ભ્રાતરસ્તત્ર તાપસા દેહસઙ્ક્ષયે ।
સપ્તદ્વીપેશ્વરાઃ સર્વે ભવિષ્યન્તિ ગૃહોદરે ॥ ૨૬॥

અષ્ટૌ હ્યેતે મહીપીઠેષ્વેતેષ્વેતેષુ સપ્તસુ ।
સપ્તદ્વીપેશ્વરા ભૂપા ભવિષ્યન્તીહ મે શૃણુ ॥ ૨૭॥

અસ્ત્યેતેષાં કિલાષ્ટાનાં ભાર્યાષ્ટકમનિન્દિતમ્ ।
દિગન્તરાણાં નિયતં તારાષ્ટકમિવોજ્જ્વલમ્ ॥ ૨૮॥

તદ્ભાર્યાષ્ટકમેતેષુ યાતેષુ તપસે ચિરમ્ ।
બભૂવ દુઃખિતં સ્ત્રીણાં યદ્વિયોગોઽહિદુઃસહઃ ॥ ૨૯॥

દુઃખિતાઃ પ્રત્યયે તેષાં ચક્રુસ્તા દારુણં તપઃ ।
શતચાન્દ્રાયણં તાસાં તુષ્ટાભૂત્તેન પાર્વતી ॥ ૩૦॥

અદૃશ્યોવાચ સા તાસાં વચોઽન્તઃપુરમન્દિરે ।
દેવી સપર્યાવસરે પ્રત્યેકં પૃથગીશ્વરી ॥ ૩૧॥

દેવ્યુવાચ ।
ભર્ત્રર્થમથ ચાત્માર્થં ગૃહ્યતાં બાલિકે વરઃ ।
ચિરં ક્લિષ્ટાસિ તપસા નિદાઘેનૈવ મઞ્જરી ॥ ૩૨॥

ઇત્યાકર્ણ્ય વચો દેવ્યા દત્તપુષ્પા ચિરણ્ટિકા ।
સ્વવાસનાનુસારેણ કુર્વાણૈવેશ્વરીસ્તવમ્ ॥ ૩૩॥

આનન્દમન્થરોવાચ વચનં મૃદુભાષિણી ।
આકાશસંસ્થિતાં દેવીં મયૂરીવાભ્રમાલિકામ્ ॥ ૩૪॥

ચિરણ્ટિકોવાચ ।
દેવિ દેવાધિદેવેન યથ તે પ્રેમશંભુના ।
ભર્ત્રા મમ તથા પ્રેમ સ ભર્તાસ્તુ મમામરઃ ॥ ૩૫॥

દેવ્યુવાચ ।
આસૃષ્ટેર્નિયતેર્દાર્ઢ્યાદમરત્વં ન લભ્યતે ।
તપોદાનૈરતોઽન્યત્વં વરં વરય સુવ્રતે ॥ ૩૬॥

ચિરણ્ટિકોવાચ ।
અલભ્યમેતન્મે દેવિ તન્મદ્ભર્તૃર્ગૃહાન્તરાત્ ।
મૃતસ્ય મા વિનિર્યાતુ જીવો બાહ્યમપિ ક્ષણાત્ ॥ ૩૭॥

દેહપાતશ્ચ મે ભર્તુર્યદા સ્યાદાત્મમન્દિરે ।
તદેતદસ્ત્વિતિ વરૂ દીયતામમ્બિકે મમ ॥ ૩૮॥

દેવ્યુવાચ ।
એવમસ્તુ સુતે ત્વં ચ પત્યૌ લોકાન્તરાસ્થિતે ।
ભવિષ્યસિ પ્રિયા ભાર્યા દેહાન્તે નાત્ર સંશયઃ ॥ ૩૯॥

ઇત્યુક્ત્વા વિરરામાસૌ ગૌર્યા ગીર્ગગનોદરે ।
મેઘમાલાધ્વનિરિવ નિરવદ્યસમુદ્યતા ॥ ૪૦॥

દેવ્યાં ગતાયાં ભર્તારસ્તાસાં કાલેન કેનચિત્ ।
તે કકુબ્ભ્યઃ સમાજગ્મુઃ સર્વે પ્રાપ્તમહાવરાઃ ॥ ૪૧॥

અદ્યાયમપિ સંયાતુ ભાર્યાયા નિકટં પતિઃ ।
ભ્રાતૃણાં બાન્ધવાનાં ચ ભવત્વન્યોન્યસઙ્ગમઃ ॥ ૪૨॥

ઇદમન્યદથૈતેષામસમઞ્જસમાકુલમ્ ।
શ‍ૃણુ કિંવૃત્તમાશ્ચર્યમાર્યકાર્યોપરોધકમ્ ॥ ૪૩॥

તપ્યતાં તપ એતેષાં પિતરૌ તૌ વધૂ યુતૌ ।
તીર્થમુન્યાશ્રમશ્રેણીં દ્રષ્ટું દુઃખાન્વિતૌ ગતૌ ॥ ૪૪॥

શરીરનૈરપેક્ષ્યેણ પુત્રાણાં હિતકામ્યયા ।
ગન્તું કલાપગ્રામં તં યત્નવન્તૌ બભૂવતુઃ ॥ ૪૫॥

તૌ પ્રયાતૌ મુનિગ્રામ માર્ગે દદૃશતુઃ સિતમ્ ।
પુરુષં કપિલં હ્રસ્વં ભસ્માઙ્ગં ચોર્ધ્વમૂર્ધજમ્ ॥ ૪૬॥

ધૂલીલવમનાદૃત્ય તં જરત્પાન્થશઙ્કયા ।
યદા તૌ જગ્મતુસ્તેન સ ઉવાચાન્વિતઃ ક્રુધા ॥ ૪૭॥

સવધૂક મહામૂર્ખ તીર્થાર્થી દારસંયુતઃ ।
માં દુર્વાસસમુલ્લઙ્ઘ્ય ગચ્છસ્યવિહિતાનતિઃ ॥ ૪૮॥

વધૂનાં તે સુતાનાં ચ ગચ્છતસ્તપસાર્જિતાઃ ।
વિપરીતા ભવિષ્યન્તિ લબ્ધા અપિ મહાવરાઃ ॥ ૪૯॥

ઇત્યુક્તવન્તં તં યાવત્સદારોઽથ વધૂયુતઃ ।
સન્માનં કુરુતે તાવન્મુનિરન્તર્ધિમાયયૌ ॥ ૫૦॥

અથ તૌ પિતરૌ તેષાં સવધૂકૌ સુદુઃખિતૌ ।

કૃશીભૂતૌ દીનમુખૌ નિરાશૌ ગૃહમાગતૌ ॥ ૫૧॥

અતો વદામ્યહં તેષાં નૈકં નામાસમઞ્જસમ્ ।
અસમઞ્જસલક્ષાણિ ગણ્ડે સ્ફોટાઃ સ્ફુટા ઇવ ॥ ૫૨॥

ચિદ્વ્યોમસઙ્કલ્પમહાપુરેઽસ્મિ-
    ન્નિત્થં વિચિત્રાણ્યસમઞ્જસાનિ ।
નિઃશૂન્યરૂપેઽપિ હિ સંભવન્તિ
    દૃશ્યે યથા વ્યોમનિ દૃશ્યજૃમ્ભાઃ ॥ ૫૩॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
તાપસોપાખ્યાનાન્તર્ગતસપ્તદ્વીપેશ્વરો સપ્તદ્વીપેશ્વર
નામ વ્યશીત્યધિકશતતમઃ સર્ગઃ ॥ ૧૮૨॥ -૧૦-

---

॥ અથ એકાદશોઽધ્યાયઃ ॥

॥ દ્વીપસપ્તકાષ્ટકવર્ણનમ્ ॥

કુન્દદન્ત ઉવાચ ।
તતઃ પૃષ્ટો મયા તત્ર સ ગૌર્યાશ્રમતાપસઃ ।
તાપસંશુષ્કદર્ભાગ્રજરાજર્જરમૂર્ધજઃ ॥ ૧॥

એકૈવ સપ્તદ્વીપાસ્તિ વસુધા યત્ર તત્ર તે ।
સપ્તદ્વીપેશ્વરા અષ્ટૌ ભવન્તિ કથમુત્તમાઃ ॥ ૨॥

યસ્ય જીવસ્ય સદનાન્નાસ્તિ નિર્ગમનં બહિઃ ।
સ કરોતિ કથં સપ્તદ્વીપેશત્વેન દિગ્જયમ્ ॥ ૩॥

યૈર્વરા વરદૈર્દત્તાઃ શાપૈસ્તે તદ્વિરુદ્ધતામ્ ।
કથં ગચ્છન્તિ ગચ્છન્તિ કથં છાયા હિ તાપતામ્ ॥ ૪॥

મિથોઽશક્યાં કથં ધર્મૌ સ્થિતિમેકત્ર ગચ્છતઃ ।
આધાર એવાધેયત્વં કરોતિ કથમાત્મનિ ॥ ૫॥

ગૌર્યાશ્રમતાપસ ઉવાચ ।
સમ્પશ્યસિ કિમેતેષાં ભો સાધો શ◌ૃણ્વનન્તરમ્ ।
અષ્ટમેઽસ્મિન્સુસમ્પ્રાપ્તે તં પ્રદેશં સબાન્ધવમ્ ॥ ૬॥

ઇતો ભવન્તૌ તં દેશમાસાદ્ય સુખસંસ્થિતૌ ।
સ્વબન્ધુસુખસંસ્થાનૌ કઞ્ચિત્કાલં ભવિષ્યતઃ ॥ ૭॥

તતસ્તેઽષ્ટૌ મરિષ્યન્તિ ભ્રાતરઃ ક્રમશો ગૃહે ।
બાન્ધવોઽથ કરિષ્યન્તિ તેષાં દેહાંસ્તદગ્નિસાત્ ॥ ૮॥

તેષાં તે સંવિદાકાશઃ પૃથક્પૃથગવસ્થિતાઃ ।
મુહૂર્તમાત્રં સ્થાસ્યન્તિ સુષુપ્તસ્થા જડા ઇવ ॥ ૯॥

એતસ્મિન્નન્તરે તેષાં તાનિ કર્માણિ ધર્મતઃ ।
એકત્ર સઙ્ઘટિષ્યન્તિ વરશાપાત્મકાનિ ખે ॥ ૧૦॥

કર્માણિ તાન્યધિષ્ઠાતૃદેવરૂપાણિ પેટકમ્ ।
વરશાપશરીરાણિ કરિષ્યન્તિ પૃથક્ પૃથક્ ॥ ૧૧॥

વરાસ્તેઽત્ર ગમિષ્યન્તિ સુભગાઃ પદ્મપાણયઃ ।
બ્રહ્મદણ્ડાયુધાશ્ચન્દ્રધવલાઙ્ગાશ્ચતુર્ભુજાઃ ॥ ૧૨॥

શાપાસ્તત્ર ભવિષ્યન્તિ ત્રિનેત્રાઃ શૂલપાણયઃ ।
ભીષણાઃ કૃષ્ણમેઘાભા દ્વિભુજા ભ્રુકુટીમુખાઃ ॥ ૧૩॥

વરા વદિષ્યન્તિ
સુદૂરં ગમ્યતાં શાપાઃ કાલોઽસ્માકમુપાગતઃ ।
ઋતૂનામિવ તન્નામ કઃ સમર્થોઽતિવર્તિતુમ્ ॥ ૧૪॥

શાપા વદિષ્યન્તિ
ગમ્યતાં હે વરા દૂરં કાલોઽસ્માકમુપાગતઃ ।
ઋતૂનામિવ તન્નામ કઃ સમર્થોઽતિવર્તિતુમ્ ॥ ૧૫॥

વરા વદિષ્યન્તિ
કૃતા ભવન્તો મુનિના વયં દિનકૃતા કૃતાઃ ।
મુનીનાં ચાધિકો દેવો ભગવન્તં પુરા યતઃ ॥ ૧૬॥

પ્રવદત્સુ વરેષ્વેવં શાપાઃ ક્રુદ્ધધિયો વરાન્ ।
વિવસ્વતા કૃતા યૂયં વયં રુદ્રાંશતઃ કૃતાઃ ॥ ૧૭॥

દેવાનામધિકો રુદ્રો રુદ્રાંશપ્રભવો મુનિઃ ।
ઇત્યુક્ત્વા પ્રોદ્યતા તેષાં ચક્રુઃશ્રુઙ્ગાણ્યગા ઇવ ॥ ૧૮॥

અશાપેષૂદ્યતશ‍ૃઙ્ગેષુ વરા ઇદમરાતિષુ ।

વિહસન્તઃ પ્રવક્ષ્યન્તિ પ્રમેયીકૃતનિશ્ચયમ્ ॥ ૧૯॥

હે શાપાઃ પાપતાં ત્યક્ત્વા કાર્યસ્યાન્તો વિચાર્યતામ્ ।
યત્કાર્યં કલહસ્યાન્તે તદેવાદૌ વિચાર્યતામ્ ॥ ૨૦॥

પિતામહપુરીં ગત્વા કલહાન્તે વિનિર્ણયઃ ।
કર્તવ્યોઽસ્માભિરેતતત્કિમાદૌ નેહ વિધીયતે ॥ ૨૧॥

શાપૈર્વરોક્તમાકર્ણ્ય બાઢમિત્યુરરીકૃતમ્ ।
કો ન ગૃહ્ણાતિ મૂઢોઽપિ વાક્યં યુક્તિસમન્વિતમ્ ॥ ૨૨॥

તતઃ શાપા વરૈઃ સાર્ધં યાસ્યન્તિ બ્રહ્મણઃ પુરમ્ ।
મહાનુભાવા હિ ગતિઃ સદા સન્દેહનશને ॥ ૨૩॥

પ્રણામપૂર્વં તત્સર્વં યથાવૃત્તં પરસ્પરમ્ ।
બ્રહ્મણે કથયિષ્યન્તિ શ્રુત્વા તેષાં સ વક્ષ્યતિ ॥ ૨૪॥

બ્રહ્મોવાચ ।
વરશાપાધિપા ભોભો યેઽન્તઃ સારા જયન્તિ તે ।
કેઽન્તઃસારા ઇતિ મિથો નૂનમન્વિષ્યતાં સ્વયમ્ ॥ ૨૫॥

ઇતિ શ્રુત્વા પ્રવિષ્ટાસ્તે સારતાં સમવેક્ષિતુમ્ ।
વરાણાં હૃદયં શાપાઃ શાપાનાં હૃદયં વરાઃ ॥ ૨૬॥

તે પરસ્પરમન્વિષ્ય સ્વયં હૃદયસારતામ્ ।
જ્ઞાત્વા ચ સમવાયેન પ્રવક્ષ્યન્તિ પિતામહમ્ ॥ ૨૭॥

શાપા વક્ષ્યન્તિ
જિતાઃ પ્રજાનાથ વયં નાન્તઃસારા વયં યતઃ ।
અન્તઃસારા વરા એવ વજ્રસ્તમ્ભા ઇવાચલાઃ ॥ ૨૮॥

વયં કિલેમે ભગવન્વરાઃ શાપાશ્ચ સર્વદા ।
નનુ સંવિન્મયા એવ દેહોઽન્યોઽસ્માકમસ્તિ નો ॥ ૨૯॥

વરદસ્ય હિ યા સંવિદ્વરો દત્ત ઇતિ સ્થિતા ।
સૈવાર્થિનિ મયા લબ્ધો વરોઽયમિતિ તિષ્ઠતિ ॥ ૩૦॥

વિજ્ઞપ્તિમાત્રવચનં દેહં સૈવ ફલં તતઃ ।
પશ્યત્યનુભવત્યત્તિ દેશકાલશતભ્રમૈઃ ॥ ૩૧॥

વરદાત્મા ગૃહીતત્વાચ્ચિત્કાલાન્તરસંભૃતા ।

યદા તદાન્તઃસારાસૌ દુર્જયા ન તુ શાપજા ॥ ૩૨॥

વરપ્રદાનં વરદૈર્વરદાનાં વરાર્થિભિઃ ।
યદા સુચિરમભ્યસ્તં વરાણાં સારતા તદા ॥ ૩૩॥

યદેવ સુચિરં સંવિદભ્યસ્યતિ તદેવ સા ।
સારમેવાશુ ભવતિ ભવત્યાશુ ચ તન્મયી ॥ ૩૪॥

શુદ્ધાનામતિશુદ્ધૈવ સંવિજ્જયતિ સંવિદામ્ ।
અશુદ્ધાનાં ત્વશુદ્ધૈવ કાલાત્સામ્યં ન વિદ્યતે ॥ ૩૫॥

ક્ષણાંશેનાપિ યો જ્યેષ્ઠો ન્યાયસ્તેનાવપૂર્યતે ।
નાર્થે ન્યાયાન્તરં કિઞ્ચિત્કર્તુમુત્સહતે મદમ્ ॥ ૩૬॥

સમેનોભયકોટિસ્થં મિશ્રં વસ્તુ ભવેત્સમમ્ ।
વરશાપવિલાસેન ક્ષીરમિશ્રં યથા પયઃ ॥ ૩૭॥

સમાભ્યાં વરશાપાભ્યામથવા ચિદ્વિરૂપતામ્ ।
સ્વયમેવાનુભવતિ સ્વપ્નેષ્વિવ પુરાત્મિકા ॥ ૩૮॥

શિક્ષિતં ત્વત્ત એવેતિ યત્તદેવ તવ પ્રભો ।
પુનઃ પ્રતીપં પઠિતં શીઘ્રં યામો નમોઽસ્તુ તે ॥ ૩૯॥

ઇત્યુક્ત્વા સ સ્વયંશાપઃ ક્વાપિ શાપગણો યયૌ ।
પ્રશાન્તે તિમિરે દૃષ્ટે વ્યોમ્નિ કેશોણ્ડ્રકં યથા ॥ ૪૦॥

અથાન્યો વરપૂગોઽત્ર ગૃહનિર્ગમરોધકઃ ।
સ્થાનિસ્થાનમિવાદેશઃ સમાનાર્થોઽભ્યપૂરયત્ ॥ ૪૧॥

શાપસ્થાનકા વદિષ્યન્તિ
સપ્તદ્વીપેશજીવાનાં નિર્યાણં શવસદ્મનઃ ।
દેવેશ વિઘ્નો ન વયમન્ધકૂપાદિવામ્ભસામ્ ॥ ૪૨॥

સપ્તદ્વીપેશ્વરાનેતાનિમે દ્વીપેષુ સદ્મસુ ।
કારયન્તિ વરા વર્યા વીરા દિગ્વિજયં રણે ॥ ૪૩॥

તદેવમનિવાર્યેઽસ્મિન્વિરોધે વિબુધેશ્વર ।
યદનુષ્ઠેયમસ્માભિસ્તદાદિશ શિવાય નઃ ॥ ૪૪॥

બ્રહ્મોવાચ ।
સપ્તદ્વીપેશ્વરવરા ગૃહરોધવરાશ્ચ હે ।

કામઃ સમ્પન્ન એવેહ ભવતાં ભવતામપિ ॥ ૪૫॥

વ્રજતૈતદપેક્ષત્વં યાવન્નેષ્ટાવપિ ક્ષણાત્ ।
ચિરં ચિરાય સદને સપ્તદ્વીપેશ્વરાઃ સ્થિતાઃ ॥ ૪૬॥

સમનન્તરમેવૈતે દેહપાતાત્સ્વસદ્મસુ ।
સપ્તદ્વીપેશ્વરાઃ સર્વે સમ્પન્નાઃ પરમં વરાઃ ॥ ૪૭॥

સર્વે વરા વદિષ્યન્તિ
કુતો ભૂમણ્ડલાન્યષ્ટૌ સપ્તદ્વીપાનિ ભૂતયઃ ।
એકમેવેહ ભૂપીઠં શ્રુતં દૃષ્ટં ચ નેતરત્ ॥ ૪૮॥

કથં ચૈતાનિ તિષ્ઠન્તિ કસ્મિંશ્ચિદ્ગૃહકોશકે ।
પદ્માક્ષકોશકે સૂક્ષ્મે કથં ભાન્તિ મતઙ્ગજાઃ ॥ ૪૯॥

બ્રહ્મોવાચ ।
યુક્તં યુષ્માભિરસ્માભિઃ સર્વં વ્યોમાત્મકં જગત્ ।
સ્થિતં ચિત્પરમાણ્વન્તરન્તઃસ્વપ્નોઽનુભૂયતે ॥ ૫૦॥

ભાતિ યત્પરમસ્યાણોરન્તસ્થસ્વગૃહોદરે ।
સ્ફુરિતં તત્કિમાશ્ચર્યં કઃ સ્મયઃ પ્રકૃતેઃ ક્રમે ॥ ૫૧॥

મૃતેરનન્તરં ભાતિ યથાસ્થિતમિદં જગત્ ।
શૂન્યાત્મૈવ ઘનાકારં તસ્મિન્નેવ ક્ષણે ચિતઃ ॥ ૫૨॥

અણાવપિ જગન્માતિ યત્ર તત્ર ગૃહોદરે ।
સપ્તદ્વીપા વસુમતી કચતીતિ કિમદ્ભુતમ્ ॥ ૫૩॥

યદ્ભાતીદં ચ ચિત્તત્વં જગત્વં જગત્ક્વચિત્ ।
ચિન્માત્રમેવ તદ્ભાતિ શૂન્યત્વેન યથામ્બરમ્ ॥ ૫૪॥

ઇતિ તે બ્રહ્મણા પ્રોક્તા વરદેન વરાસ્તતઃ ।
તાનાધિભૌતિકભ્રાન્તિમયાન્સન્ત્યજ્ય દેહકાન્ ॥ ૫૫॥

પ્રણમ્યાજં સમં જગ્મુરાતિવાહિકદેહિનઃ ।
સપ્તદ્વીપે ચ દેવાનાં ગૃહકોશાન્કચજ્જનાન્ ॥ ૫૬॥

યાવત્તે તત્ર સમ્પન્ના સપ્તદ્વીપાધિનાયકાઃ ।
અષ્ટાવપીષ્ટાપુષ્ટાનાં દિનાષ્ટકમહીભુજામ્ ॥ ૫૭ ॥।

તે પરસ્પરમજ્ઞાતા અજ્ઞાશ્ચાન્યોન્યબન્ધવઃ ।

અન્યોન્યભૂમણ્ડલગા અન્યોન્યાભિમતે હિતાઃ ॥ ૫૮॥

તેષાં કશ્ચિદ્ગૃહસ્યાન્તરેવ તારુણ્યસુન્દરઃ ।
ઉજ્જયિન્યાં મહાપુર્યાં રાજધાન્યાં સુખે સ્થિતઃ ॥ ૫૯॥

શાકદ્વીપાસ્પદઃ કશ્ચિન્નાગલોકજિગીષયા ।
વિચરત્યબ્ધિજઠરે સર્વદિગ્વિજયોદ્યતઃ ॥ ૬૦॥

કુશદ્વીપરાજધાન્યાં નિરાધિઃ સકલપ્રજાઃ ।
કૃતદિગ્વિજયઃ કશ્ચિત્સુપ્તઃ કાન્તાવલમ્બિતઃ ॥ ૬૧॥

શાલ્મલિદ્વીપશૈલેન્દ્રશિરઃપુર્યાઃ સરોવરે ।
જલલીલારતઃ કશ્ચિત્સહવિદ્યાધરીગણૈઃ ॥ ૬૨॥

ક્રૌઞ્ચદ્વીપે હેમપુરે સપ્તદ્વીપવિવર્ધિતે ।
પ્રવૃત્તો વાજિમેધેન કશ્ચિદ્યષ્ટું દિનાષ્ટકમ્ ॥ ૬૩॥

ઉદ્યતઃ શાલ્મલિદ્વીપે કશ્ચિદ્દ્વીપાન્તચારિણા ।
યોદ્ધુમુદ્ધૃતદિગ્દન્તિદન્તાકૃષ્ટકુલાચલઃ ॥ ૬૪॥

ગોમેદદ્વીપકઃ કશ્ચિત્પુષ્કરદ્વીપરાટ્ સુતામ્ ।
સમાનેતું વશાદ્યાતિ કષત્સેનોઽષ્ટમોઽભવત્ ॥ ૬૫॥

પુષ્કરદ્વીપકઃ કશ્ચિલ્લોકાલોકાદ્રિભૂભુજઃ ।
દૂતેન સહ નિર્યાતો ધનભૂમિદિદૃક્ષયા ॥ ૬૬॥

પ્રત્યેકમિત્થમેતેષાં દ્વીપદ્વીપાધિનાથતામ્ ।
કુર્વતાં સ્વગૃહાકાશે દૃષ્ટ્વા સ્વપ્રતિભોચિતામ્ ॥ ૬૭॥

ત્યક્તાભિમાનિકાકારા દ્વિવિધાસ્તે વરાસ્તતઃ ।
તત્સંવિદ્ભિર્ગૃહેષ્વન્તરેકતાં ખાનિ ખૈરિવ ॥ ૬૮॥

યાસ્યન્તિ તે ભવિષ્યન્તિ સમ્પ્રાપ્તાભિમતાશ્ચિરમ્ ।
સપ્તદ્વીપેશ્વરાસ્તુષ્ટા નન્વષ્ટાવપિ તુષ્ટિમત્ ॥ ૬૯॥

ઇત્યેતે પ્રવિકસિતોદિતક્રિયાર્થાઃ
    પ્રાપ્સ્યન્તિ પ્રવિતતબુદ્ધયસ્તપોભિઃ ।
અન્તર્યત્સ્ફુરતિ વિદસ્તદેવ બાહ્યે
    નાપ્તં કૈસ્તદુચિતકર્મભિઃ કિલેતિ ॥ ૭૦॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે

મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
તાપસોપાખ્યાનાન્તર્ગત દ્વીપસપ્તકાષ્ટકવર્ણનં
નામ ત્રિસપ્તત્યધિકશતતમઃ સર્ગઃ ॥ ૧૮૩॥ -૧૧-

---

॥ અથ દ્વાદશોઽધ્યાયઃ ॥

॥ કુન્દદન્તોપદેશઃ ॥

કુન્દદન્ત ઉવાચ ।
ઇત્યુક્તવાનસૌ પૃષ્ટઃ કદમ્બતલતાપસઃ ।
સપ્તદ્વીપા ભુવોઽષ્ટૌ તાઃ કથં ભ્રાતા ગૃહેષ્વિતિ ॥ ૧॥

કદમ્બતાપસ ઉવાચ ।
ચિદ્ધાતુરીદૃગેવાયં યદેશ વ્યોમરૂપ્યપિ ।
સર્વગો યત્ર યત્રાસ્તે તત્ર તત્રાત્મનિ સ્વયમ્ ॥ ૨॥

આત્માનમિત્થં ત્રૈલોક્યરૂપેણાન્યેન વા નિજમ્ ।
પરિપશ્યતિ રૂપં સ્વમત્યજન્નેવ ખાત્મકમ્ ॥ ૩॥

કુન્દદન્ત ઉવાચ ।
એકસ્મિન્વિમલે શાન્તે શિવે પરમકારણે ।
કથં સ્વભાવસંસિદ્ધા નાનાતા વાસ્તવી સ્થિતા ॥ ૪॥

કદમ્બતાપસ ઉવાચ ।
સર્વં શાન્તં ચિદાકાશં નાનાસ્તીહ ન કિઞ્ચન ।
દૃશ્યમાનમપિ સ્ફારમાવર્તાત્મા યથામ્ભસિ ॥ ૫॥

અસત્સ્વેષુ પદાર્થેષુ પદાર્થા ઇતિ ભાન્તિ યત્ ।
ચિત્ખં સ્વપ્નસુષુપ્તાત્મ તત્તસ્યાચ્છં નિજં વપુઃ ॥ ૬॥

સસ્પન્દોઽપિ હિ નિઃસ્પન્દઃ પર્વતોઽપિ ન પર્વતઃ ।
યથા સ્વપ્નેષુ ચિદ્ભાવઃસ્વભોઽર્થગતસ્તથા ॥ ૭॥

ન સ્વભાવા ન ચૈવાર્થાઃ સન્તિ સર્વાત્મકોચિતે ।
સર્ગાદૌ કચિતં રૂપં યદ્યથા તત્તથા સ્થિતમ્ ॥ ૮॥

ન ચ નામ પરં રૂપં કચનાકચનાત્મકમ્ ।
દ્રવ્યાત્મા ચિચ્ચ ચિદ્વ્યોમ સ્થિતમિત્થં હિ કેવલમ્ ॥ ૯॥

એકૈવ ચિદ્યથા સ્વપ્ને સેનાયાં જનલક્ષતામ્ ।
ગતેવાચ્છૈવ કચતિ તથૈવાસ્યાઃ પદાર્થતા ॥ ૧૦॥

યત્સ્વતઃ સ્વાત્મનિ સ્વચ્છે ચિત્ખં કચકચાયતે ।
તત્તેનૈવ તદાકારં જગદિત્યનુભૂયતે ॥ ૧૧॥

અસત્યપિ યથા વહ્નાવુષ્ણસંવિદ્ધિ ભાસતે ।
સંવિન્માત્રાત્મકે વ્યોમ્નિ તથાર્થઃ સ્વસ્વભાસકઃ ॥ ૧૨॥

અસત્યપિ યથા સ્તમ્ભે સ્વપ્ને ખે સ્તમ્ભતા વિદઃ ।
તથેદમસ્યા નાનાત્વમનન્યદપિ ચાન્યવત્ ॥ ૧૩॥

આદિસર્ગે પદાર્થત્વં તત્સ્વભાવાચ્છમેવ ચ ।
ચિદ્વ્યોમ્ના યદ્યથા બુદ્ધં તત્તથાદ્યાપિ વિન્દતે ॥ ૧૪॥

પુષ્પે પત્રે ફલે સ્તમ્ભે તરુરેવ યથા તતઃ ।
સર્વં સર્વત્ર સર્વાત્મ પરમેવ તથાઽપરમ્ ॥ ૧૫॥

પરમાર્થામ્બરામ્ભોધાવાપઃ સર્ગ પરંપરા ।
પરમાર્થ મહાકાશે શૂન્યતા સર્ગસંવિદઃ ॥ ૧૬॥

પરમાર્થશ્ચ સર્ગશ્ચ પર્યાયૌ તરુવૃક્ષવત્ ।
બોધાદેતદબોધાત્તુ દ્વૈતં દુઃખાય કેવલમ્ ॥ ૧૭॥

પરમાર્થો જગચ્ચેદકમિત્યેવ નિશ્ચયઃ ।
અધ્યાત્મશાસ્ત્રબોધેન ભવેત્સૈષા હિ મુક્તતા ॥ ૧૮॥

સઙ્કુલ્પસ્ય વપુર્બ્રહ્મ સઙ્કુલ્પકચિદાકૃતેઃ ।
તદેવ જગતો રૂપં તસ્માદ્બ્રહ્માત્મકં જગત્ ॥ ૧૯॥

યતો વાચો નિવર્તન્તે ન નિવર્તન્ત એવ વા ।
વિધયઃ પ્રતિષેધાશ્ચ ભાવાભાવદૃશસ્તથા ॥ ૨૦॥

અમૌનમૌનં જીવાત્મ યત્પાષાણવદાસનમ્ ।
યત્સદેવાસદાભાસાં તદ્બ્રહ્માભિધમુચ્યતે ॥ ૨૧॥

સર્વસ્મિન્નેકસુઘને બ્રહ્મણ્યેવ નિરામયે ।
કા પ્રવૃત્તિર્નિવૃત્તિઃ કા ભાવાભાવાદિવસ્તુનઃ ॥ ૨૨॥

એકસ્યામેવ નિદ્રાયાં સુષુપ્તસ્વપ્નવિભ્રમાઃ ।
યદા ભાન્ત્યવિચિત્રાયાં ચિત્રા ઇવ નિરન્તરાઃ ॥ ૨૩॥

એતસ્યાં ચિત્ખસત્તાયાં તથા મૂલકસર્ગકાઃ ।
બહવો ભાન્ત્યચિત્રાયાં ચિત્રા ઇવ નિરન્તરાઃ ॥ ૨૪॥

દ્રવ્યે દ્રવ્યાન્તરશ્લિષ્ટં યત્કાર્યાન્તરમાક્ષિપેત્ ।
તદ્વદન્તસ્તથાભૂતચિત્સારં સ્ફુરણં મિથઃ ॥ ૨૫॥

સર્વે પદાર્થાશ્ચિત્સારમાત્રમપ્રતિઘાઃ સદા ।
યથા ભાન્તિ તથા ભાન્તિ ચિન્માત્રૈકાત્મતાવશાત્ ॥ ૨૬ ।
ચિન્માત્રૈકાત્મસારત્વાદ્યથાસંવેદનં સ્થિતાઃ ।
નિઃસ્પન્દા નિર્મનસ્કારાઃ સ્ફુરન્તિ દ્રવ્યશક્તયઃ ॥ ૨૭॥

અવિદ્યમાનમેવેદં દૃશ્યતેઽથાનુભૂયતે ।
જગત્સ્વપ્ન ઇવાશેષં સરુદ્રોપેન્દ્રપદ્મજમ્ ॥ ૨૮॥

વિચિત્રાઃ ખલુ દૃશ્યન્તે ચિજ્જલે સ્પન્દરીતયઃ ।
હર્ષામર્ષવિષાદોત્થજઙ્ગમસ્થાવરાત્મનિ ॥ ૨૯॥

સ્વભાવવાતાધૂતસ્ય જગજ્જાલચમત્કૃતેઃ ।
હા ચિન્મરીચિપાંશ્વભ્રનીહારસ્ય વિસારિતા ॥ ૩૦॥

યથા કેશોણ્ડ્રકં વ્યોમ્નિ ભાતિ વ્યામલચક્ષુષઃ ।
તથૈવેયં જગદ્ભાન્તિર્ભાત્યનાત્મવિદોઽમ્બરે ॥ ૩૧॥

યાવત્સઙ્કલ્પિતં તાવદ્યથા સઙ્કલ્પિતં તથા ।
યથા સઙ્કલ્પનગરં કચતીદં જગત્તથા ॥ ૩૨॥

સઙ્કલ્પનગરે યાવત્સઙ્કલ્પસકલા સ્થિતિઃ ।
ભવત્યેવાપ્યસદ્રૂપા સતીવાનુભવે સ્થિતા ॥ ૩૩॥

પ્રવહત્યેવ નિયતિર્નિયતાર્થપ્રદાયિની ।
સ્થાવરં જઙ્ગમં ચૈવ તિષ્ઠત્યેવ યથાક્રમમ્ ॥ ૩૪॥

જાયતે જઙ્ગમં જીવાત્સ્થાવરં સ્થાવરાદપિ ।
નિયત્યાધો વહત્યમ્બુ ગચ્છત્યૂર્ધ્વમથાનલઃ ॥ ૩૫॥

વહન્તિ દેહયન્ત્રાણિ જ્યોતીંષિ પ્રતપન્તિ ચ ।
વાયવો નિત્યગતયઃ સ્થિતાઃ શૈલાદયઃ સ્થિરાઃ ॥ ૩૬॥

જ્યોતિર્મયં નિવૃત્તં તુ ધારાસારામ્બરીકૃતમ્ ।

યુગસંવત્સરાદ્યાત્મ કાલચક્રં પ્રવર્તતે ॥ ૩૭॥

ભૂતલૈકાન્તરાબ્ધ્યદ્રિસંનિવેશઃ સ્થિતાયતે ।
ભાવાભાવોગ્રહોત્સર્ગદ્રવ્યશક્તિશ્ચ તિષ્ઠતિ ॥ ૩૮॥

કુન્દદન્ત ઉવાચ ।
પ્રાગ્દૃષ્ટં સ્મૃતિમાયાતિ તત્સ્વસઙ્કલ્પનાન્યતઃ ।
ભાતિ પ્રથમસર્ગે તુ કસ્ય પ્રાગ્દૃષ્ટભાસનમ્ ॥ ૩૯॥

તાપસ ઉવાચ ।
અપૂર્વં દૃશ્યતે સર્વં સ્વપ્ને સ્વમરણં યથા ।
પ્રાગ્દૃષ્ટં દૃષ્ટમિત્યેવ તત્રૈવાભ્યાસતઃ સ્મૃતિઃ ॥ ૪૦॥

ચિત્ત્વાચ્ચિદ્વ્યોમ્નિ કચતિ જગત્સઙ્કલ્પપત્તનમ્ ।
ન સન્નાસદિદં તસ્માદ્ભાતાભાતં યતઃ સ્વતઃ ॥ ૪૧॥

ચિત્પ્રસાદેન સઙ્કલ્પસ્વપ્નાદ્યદ્યાનુભૂયતે ।
શુદ્ધં ચિદ્વ્યોમ સઙ્કલ્પપુરં મા સ્મર્યતાં કથમ્ ॥ ૪૨॥

હર્ષામર્ષવિનિર્મુક્તૈર્દુઃખેન ચ સુખેન ચ ।
પ્રકૃતેનૈવ માર્ગેણ જ્ઞશ્ચક્રૈરિવ ગમ્યતે ॥ ૪૩॥

નિદ્રાવ્યપગમે સ્વપ્નનગરે યાદૃશં સ્મૃતૌ ।
ચિદ્વ્યોમાત્મ પરં વિદ્ધિ તાદૃશં ત્રિજગદ્ભ્રમમ્ ॥ ૪૪॥

સંવિદાભાસમાત્રં યજ્જગદિત્યભિશબ્દિતમ્ ।
તત્સંવિદ્વ્યોમ સંશાન્તં કેવલં વિદ્ધિ નેતરત્ ॥ ૪૫॥

યસ્મિન્સર્વં યતઃ સર્વં યત્સર્વં સર્વતશ્ચ યત્ ।
સર્વં સર્વતયા સર્વં તત્સર્વં સર્વદા સ્થિતમ્ ॥ ૪૬॥

યથેયં સંસૃતિર્બ્રાહ્મી ભવતો યદ્ભવિષ્યતિ ।
યથા ભાનં ચ દૃશ્યસ્ય તદેતત્કથિતં મયા ॥ ૪૭॥

ઉત્તિષ્ઠતં વ્રજતમાસ્પદમહ્નિ પદ્મં
ભૃઙ્ગાવિવાભિમતમાશુ વિધીયતાં સ્વમ્ ।
તિષ્ઠામિ દુઃખમલમસ્તસમાધિસંસ્થં
ભૂયઃ સમાધિમહમઙ્ગ ચિરં વિશામિ ॥ ૪૮॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે

મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
તાપસોપાખ્યાનાન્તર્ગત કુન્દદન્તોપદેશો નામ
ચતુઃશીત્યધિકશતતમઃ સર્ગઃ ॥ ૧૮૪॥ -૧૨-

---

॥ અથ ત્રયોદશોઽધ્યાયઃ ॥

॥ કુન્દદન્તપ્રબોધઃ ॥

કુન્દદન્ત ઉવાચ ।
જરન્મુનિરપીત્યુક્ત્વા ધ્યાનમીલિતલોચનઃ ।
આસીદસ્પન્દિતપ્રાણમનાશ્ચિત્ર ઇવાર્પિતઃ ॥ ૧॥

આવાભ્યાં પ્રણયોદારૈઃ પ્રાર્થિતોઽપિ પુનઃપુનઃ ।
વાક્યૈઃ સંસારમવિદન્ન વચો દત્તવાન્પુનઃ ॥ ૨॥

આવાં પ્રદેશતસ્તસ્માચ્ચલિત્વા મન્દમુત્સુકૌ ।
દિનૈઃ કતિપયૈઃ પ્રાપ્તૌ ગૃહં મુદિતબાન્ધવમ્ ॥ ૩॥

અથ તત્રોત્સવં કૃત્વા કથાઃ પ્રોચ્ય ચિરન્તનીઃ ।
સ્થિતાસ્તાવદ્વયં યાવત્સપ્તાપિ ભ્રાતરોઽથ તે ॥ ૪॥

ક્રમેણ વિલયં પ્રાપ્તાઃ પ્રલયેષ્વર્ણવા ઇવ ।
મુક્તોઽસૌ મે સખૈવૈક એકાર્ણવ ઇવાષ્ટકઃ ॥ ૫॥

તતઃ કાલેન સોઽપ્યસ્તં દિનાન્તેઽર્ક ઇવાગતઃ ।
અહં દુઃખપ્રીતાત્મા પરં વૈધુર્યમાગતઃ ॥ ૬॥

તતોઽહં દુઃખિતો ભૂયઃ કદમ્બતરુતાપસમ્ ।
ગતો દુઃખોપઘાતાય તજ્જ્ઞાનં પ્રષ્ટુમાદૃતઃ ॥ ૭॥

તત્ર માસત્રયેણાસૌ સમાધિવિરતોઽભવત્ ।
પ્રણતેન મયા પૃષ્ટઃ સન્નિદં પ્રોક્તવાનથ ॥ ૮॥

કદમ્બતાપસ ઉવાચ ।
અહં સમાધિવિરતઃ સ્થાતું શક્નોમિ ન ક્ષણમ્ ।
સમાધિમેવ પ્રવિશ્યામ્યહમાશુ કૃતત્વરઃ ॥ ૯॥

પરમાર્થોપદેશસ્તે નાભ્યાસેન વિનાનઘ ।
લગત્યત્ર પરાં યુક્તિમિમાં શૃણુ તતઃ કુરુ ॥ ૧૦॥

અયોધ્યાનામ પૂરસ્તિ તત્રાસ્તિ વસુધાધિપઃ ।
નામ્ના દશરથસ્તસ્ય પુત્રો રામ ઇતિ શ્રુતઃ ॥ ૧૧॥

સકાશં તત્ર ગચ્છ ત્વં તસ્મૈ કુલગુરુઃ કિલ ।
વસિષ્ઠાખ્યો મુનિશ્રેષ્ઠઃ કથયિષ્યતિ સંસદિ ॥ ૧૨॥

મોક્ષોપાયકથાં દિવ્યાં તાં શ્રુત્વા સુચિરં દ્વિજ ।
વિશ્રાન્તિમેષ્યસિ પરે પદેઽહમિવ પાવને ॥ ૧૩॥

ઇત્યુક્ત્વા સ સમાધાનરસાયનમહાર્ણવમ્ ।
વિંવશાહમિમં દેશં ત્વત્સકાશમુપાગતઃ ॥ ૧૪॥

એષોઽહમેતદ્વૃત્તં મે સર્વં કથિતવાનહમ્ ।
યથાવૃત્તં યથાદૃષ્ટં યથાશ્રુતમખણ્ડિતમ્ ॥ ૧૫॥

શ્રીરામ ઉવાચ ।
સકુન્દદન્ત ઇત્યાદિકથાકથનકોવિદઃ ।
સ્થિતસ્તતઃ પ્રભૃત્યેવ મત્સમીપગતઃ સદા ॥ ૧૬॥

સ એષ કુન્દદન્તાખ્યો દ્વિજઃ પાર્શ્વે સમાસ્થિતઃ ।
શ્રુતવાન્સંહિતામેતાં મોક્ષોપાયાભિધામિહ ॥ ૧૭॥

સ એષ કુન્દદન્તાખ્યો મમ પાર્શ્વગતો દ્વિજઃ ।
અદ્ય નિઃસંશયો જાતો ન વેતિ પરિપૃચ્છ્યતામ્ ॥ ૧૮॥

શ્રીવાલ્મીકિરુવાચ ।
ઇત્યુક્તે રાઘવેણાથ પ્રોવાચ વદતાંવરઃ ।
સ વસિષ્ઠો મુનિશ્રેષ્ઠઃ કુન્દદન્તં વિલોકયન્ ॥ ૧૯॥

શ્રીવસિષ્ઠ ઉવાચ ।
કુન્દદન્ત દ્વિજવર કથ્યતાં કિં ત્વયાનઘ ।
બુદ્ધં શ્રુતવતા જ્ઞેયં મદુક્તં મોક્ષદં પરમ્ ॥ ૨૦॥

કુન્દદન્ત ઉવાચ ।
સર્વસંશયવિચ્છેદિ ચેત એવ જયાય મે ।
સર્વસંશયવિચ્છેદો જ્ઞાતં જ્ઞેયમખણ્ડિતમ્ ॥ ૨૧॥

જ્ઞાતં જ્ઞાતવ્યમમલં દૃષ્ટં દ્રષ્ટવ્યમક્ષતમ્ ।
પ્રાપ્તં પ્રાપ્તવ્યમખિલં વિશ્રાન્તોઽસ્મિ પરે પદે ॥ ૨૨॥

બુદ્ધેયં ત્વદિદં સર્વં પરમાર્થઘનં ઘનમ્ ।
અનન્યેનાત્મનો વ્યોમ્નિ જગદ્રૂપેણ જૃમ્ભિતમ્ ॥ ૨૩॥

સર્વાત્મકતયા સર્વરૂપિણઃ સર્વગાત્મનઃ ।
સર્વં સર્વેણ સર્વત્ર સર્વદા સંભવત્યલમ્ ॥ ૨૪॥

સંભવન્તિ જગત્યન્તઃ સિદ્ધાર્થકણકોટરે ।
ન સંભવન્તિ ચ યથા જ્ઞાનમેતદશેષતઃ ॥ ૨૫॥

ગૃહેઽન્તઃ સંભવત્યેવ સપ્તદ્વીપા વસુન્ધરા ।
ગેહં ચ શૂન્યમેવાસ્તે સત્યમેતદસંશયમ્ ॥ ૨૬॥

યદ્યદ્યદા વસ્તુ યથોદિતાત્મ
    ભાતીહ ભૂતૈરનુભૂયતે ચ ।
તત્તત્તદા સર્વઘનસ્તથાસ્તે
    બ્રહ્મેત્થમાદ્યન્તવિમુક્તમસ્તિ ॥ ૨૭॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
તાપસોપાખ્યાનાન્તર્ગત કુન્દદન્તપ્રબોધો સપ્તદ્વીપેશ્વર
નામ પઞ્ચાશીત્યધિકશતતમઃ સર્ગઃ ॥ ૧૮૫॥ -૧૩-

---

## ॥ અથ ચતુર્દશોઽધ્યાયઃ ॥

### ॥ સર્વં ખલ્વિદં બ્રહ્મેતિપ્રતિપાદનયોગોપદેશઃ ॥

શ્રીવાલ્મીકિરુવાચ ।
કુન્દદન્તે વદત્યેવં વસિષ્ઠો ભગવાન્મુનિઃ ।
ઉવાચેદમનિન્દ્યાત્મા પરમાર્થોચિતં વચઃ ॥ ૧॥

શ્રીવસિષ્ઠ ઉવાચ ।
બત વિજ્ઞાનવિશ્રાન્તિરસ્ય જાતા મહાત્મનઃ ।
કરામલકવદ્વિશ્વં બ્રહ્મેતિ પરિપશ્યતિ ॥ ૨॥

કિલેદં ભ્રાન્તિમાત્રાત્મ વિશ્વં બ્રહ્મેતિ ભાત્યજમ્ ।
ભ્રાન્તિર્બ્રહ્મૈવ ચ બ્રહ્મ શાન્તમેકમનામયમ્ ॥ ૩॥

યદ્યથા યેન યત્રાસ્તિ યાદૃગ્યાવદ્યદા યતઃ ।

તત્તથા તેન તત્રાસ્તિ તાદૃક્તાવત્તદા તતઃ ॥ ૪॥

શિવં શાન્તમજં મૌનમમૌનમજરં તતમ્ ।
સુશૂન્યાશૂન્યમભવમનાદિનિધનં ધ્રુવમ્ ॥ ૫॥

યસ્યા યસ્યાસ્ત્વવસ્થાયાઃ ક્રિયતે સંવિદા ભરઃ ।
સા સા સહસ્રશાખત્વમેતિ સેકૈર્યથા લતા ॥ ૬॥

પરો બ્રહ્માણ્ડમેવાણુશ્ચિદ્વ્યોમ્નોન્તઃ સ્થિતો યતઃ ।
પરમાણુરેવ બ્રહ્માણ્ડમન્તઃ સ્થિતજગદ્યતઃ ॥ ૭॥

તસ્માચ્ચિદાકાશમનાદિમધ્ય-
    મખણ્ડિતં સૌમ્યમિદં સમસ્તમ્ ।
નિર્વાણમસ્તં ગતજાતિબન્ધો
    યથાસ્થિતં તિષ્ઠ નિરામયાત્મા ॥ ૮॥

સ્વયં દૃશ્યં સ્વયં દ્રષ્ટ સ્વયં ચિત્ત્વં સ્વયં જડમ્ ।
સ્વયં કિઞ્ચિન્ન કિઞ્ચિચ્ચ બ્રહ્માત્મન્યેવ સંસ્થિતમ્ ॥ ૯॥

યથા યત્ર જગત્યેતત્સ્વયં બ્રહ્મ ખમાત્મનિ ।
સ્વરૂપમજહચ્છાન્તં યત્ર સમ્પદ્યતે તથા ॥ ૧૦॥

બ્રહ્મ દૃશ્યમિતિ દ્વૈતં ન કદાચિદ્યથાસ્થિતમ્ ।
એકત્વમેતયોર્વિદ્ધિ શૂન્યત્વાકાશયોરિવ ॥ ૧૧॥

દૃશ્યમેવ પરં બ્રહ્મ પરં બ્રહ્મૈવ દૃશ્યતા ।
એતન્ન શાન્તં નાઽશાન્તં નાનાકારં ન ચાકૃતિઃ ॥ ૧૨॥

યાદૃક્પ્રબોધે સ્વપ્નાદિસ્તાદૃગ્દેહો નિરાકૃતિઃ ।
સંવિન્માત્રાત્મા પ્રતિઘઃ સ્વાનુભૂતોઽપ્યસન્મયઃ ॥ ૧૩॥

સંવિન્મયો યથા જન્તુર્નિદ્રાત્માસ્તે જડોઽભવત્ ।
જડીભૂતા તથૈવાસ્તે સંવિત્સ્થાવરનામિકા ॥ ૧૪॥

સ્થાવરત્વાજ્જડાચ્ચિત્ત્વં જઙ્ગમાત્મ પ્રયાતિ ચિત્ ।
જીવઃ સુષુપ્તાત્મા સ્વપ્નં જાગ્રચ્ચૈવ જગચ્છતૈઃ ॥ ૧૫॥

આમોક્ષમેષા જીવસ્ય ભુવ્યમ્ભસ્યનિલેઽનલે ।
ખે ખાત્મભિર્જગલ્લક્ષૈઃ સ્વપ્નાભૈર્ભાસતે સ્થિતિઃ ॥ ૧૬॥

ચિચ્ચિનોતિ તથા જાડ્યં નરો નિદ્રાસ્થિતિર્યથા ।

ચિનોતિ જડતાં ચિત્ત્વં ન નામ જડતાવશાત્ ॥ ૧૭॥

ચિતા વેદન વેત્તારં સ્થાવરં ક્રિયતે વપુઃ ।
ચિતા વેદન વેત્તારં જઙ્ગમં ક્રિયતે વપુઃ ॥ ૧૮॥

યથા પુંસો નખાઃ પાદવેકમેવ શરીરકમ્ ।
તથૈકમેવાપ્રતિઘં ચિતઃ સ્થાવરજઙ્ગમમ્ ॥ ૧૯॥

આદિસર્ગે સ્વપ્ન ઇવ યત્પ્રથામાગતં સ્થિતમ્ ।
ચિતો રૂપં જગદિતિ તત્તથૈવાન્ત ઉચ્યતે ॥ ૨૦॥

તચ્ચૈવાપ્રતિઘં શાન્તં યથાસ્થિતમવસ્થિતમ્ ।
ન પ્રથામાગતં કિઞ્ચિન્નાસીદપ્રથિતં હિતમ્ ॥ ૨૧॥

અયમાદિરયં ચાન્તઃ સર્ગસ્યેત્યવભાસતે ।
ચિતઃ સુઘનનિદ્રાયાઃ સુષુપ્તસ્વપ્નકોષ્ઠતઃ ॥ ૨૨॥

સ્થિત એકો હ્યનાદ્યન્તઃ પરમાર્થઘનો યતઃ ।
પ્રલયસ્થિતિસર્ગાણાં ન નામાપ્યસ્તિ માં પ્રતિ ॥ ૨૩॥

પ્રલયસ્થિતિસર્ગાદિ દૃશ્યમાનં ન વિદ્યતે ।
એતન્ન ચાત્મનશ્ચાન્યચ્ચિત્રે ચિત્રવધૂર્યથા ॥ ૨૪॥

કર્તવ્યચિત્રસેનાસ્માદ્યથા ચિત્રાન્ન ભિદ્યતે ।
નાનાઽનાનૈવ પ્રતિઘા ચિત્તત્ત્વે સર્ગતા તથા ॥ ૨૫॥

વિભાગહીનયાપ્યેષ ભાગશ્ચિદ્ઘનનિદ્રયા ।
સુષુપ્તાન્મુચ્યતે મોક્ષ ઇતિ સ્વપ્નસ્તુ ચિત્તકમ્ ॥ ૨૬॥

પ્રલયોઽયમિયં સૃષ્ટિરયં સ્વપ્નો ઘનસ્ત્વયમ્ ।
ભાસોઽપ્રતિઘરૂપસ્ય ચિત્સહસ્રરુચેરિતિ ॥ ૨૭॥

ચિન્નિદ્રાયાઃ સ્વપ્નમયો ભાગશ્ચિત્તમુદાહૃતમ્ ।
તદેવ મુચ્યતે ભૂતં જીવો દેવસસુરાદિદૃક્ ॥ ૨૮॥

એષ એવ પરિજ્ઞાતઃ સુષુપ્તિર્ભવતિ સ્વયમ્ ।
યદા તદા મોક્ષ ઇતિ પ્રોચ્યતે મોક્ષકાઙ્ક્ષિભિઃ ॥ ૨૯॥

શ્રીરામ ઉવાચ ।
ચિત્તં દેવાસુરાદ્યાત્મ ચિન્નિદ્રા સ્વાત્મદર્શનમ્ ।
કિયત્પ્રમાણં ભગવન્કથમસ્યોદરે જગત્ ॥ ૩૦॥

શ્રીવસિષ્ઠ ઉવાચ ।
વિદ્ધિ ચિત્તં નરં દેવમસુરં સ્થાવરં સ્ત્રિયમ્ ।
નાગં નગં પિશાચાદિ ખગકીટાદિરાક્ષસમ્ ॥ ૩૧॥

પ્રમાણં તસ્ય ચાનન્તં વિદ્ધિ યદ્યત્ર રેણુતામ્ ।
આબ્રહ્મસ્તમ્બપર્યન્તં જગદ્યાતિ સહસ્રશઃ ॥ ૩૨॥

યદેતદાદિત્યપથાદૂર્ધ્વં સંયાતિ વેદનમ્ ।
એતચ્ચિતં ભૂતમેતદપર્યન્તામલાકૃતિ ॥ ૩૩॥

એતદુગ્રં ચિતો રૂપમસ્યાન્તર્ભુવનર્દ્ધયઃ ।
યદાયાન્તિ તદા સર્ગશ્ચિત્તાદાગત ઉચ્યતે ॥ ૩૪॥

ચિત્તમેવ વિદુર્જીવં તદાદ્યન્તવિવર્જિતમ્ ।
ખં ઘટેષ્વિવ દેહેષુ ચાસ્તે નાસ્તે તદિચ્છયા ॥ ૩૫॥

નિમ્નોન્નતાન્ભુવો ભાગાન્ ગૃહ્ણાતિ ચ જહાતિ ચ ।
સરિત્પ્રવાહોઽઙ્ગ યથા શરીરાણિ તથા મનઃ ॥ ૩૬॥

અસ્ય ત્વાત્મપરિજ્ઞાનાદેષ દેહાદિસંભ્રમઃ ।
શામ્યત્યાશ્વવબોધેન મરુવાઃપ્રત્યયો યથા ॥ ૩૭॥

જગત્યન્તરણુર્યત્ર તત્પ્રમાણં હિ ચેતસઃ ।
સદેવ ચ પુમાંસ્તસ્માત્પુંસામન્તઃ સ્થિતં જગત્ ॥ ૩૮॥

યાવત્કિઞ્ચિદિદં દૃશ્યં તચ્ચિત્તં સ્વપ્નભૂષ્વિવ ।
તદેવ ચ પુમાંસ્તસ્માત્કો ભેદો જગદાત્મનોઃ ॥ ૩૯॥

ચિદેવાયં પદાર્થૌઘો નાસ્ત્યન્યસ્મિન્પદાર્થતા ।
વ્યતિરિક્તા સ્વપ્ન ઇવ હેમ્નીવ કટકાદિતા ॥ ૪૦॥

યથૈકદેશે સર્વત્ર સ્ફુરન્ત્યાપોઽમ્બુધૌ પૃથક્ ।
બ્રહ્મણ્યનન્યા નિત્યસ્થાશ્ચિતો દૃશ્યાત્મિકાસ્તથા ॥ ૪૧॥

યથા દ્રવત્વમમ્ભોધાવાપો જઠરકોશગાઃ ।
સ્ફુરન્ત્યેવંવિદાઽનન્યાઃ પદાર્થૌઘાસ્તથાપરે ॥ ૪૨॥

યથા સ્થિતજગચ્છાલભઞ્જિકાકાશરૂપધૃક્ ।
ચિત્સ્તમ્ભોયમપસ્પન્દઃ સ્થિત આદ્યન્તવર્જિતઃ ॥ ૪૩॥

યથાસ્થિતમિદં વિશ્વં સંવિદ્વ્યોમ્નિ વ્યવસ્થિતમ્ ।
સ્વરૂપમત્યજચ્છાન્તં સ્વપ્નભૂમાવિવાખિલમ્ ॥ ૪૪॥

સમતા સત્યતા સત્તા ચૈકતા નિર્વિકારિતા ।
આધારાધેયતાન્યોન્યં ચૈતયોર્વિશ્વસંવિદોઃ ॥ ૪૫॥

સ્વપ્નસઙ્કલ્પસંસારવરશાપદૃશામિહ ।
સરોબ્ધિસરિદમ્બૂનામિઅવાન્યત્વં ન વાથવા ॥ ૪૬॥

શ્રીરામ ઉવાચ ।
વરશાપાર્થસંવિત્તૌ કાર્યકારણતા કથમ્ ।
ઉપાદાનં વિના કાર્યં નાસ્ત્યેવ કિલ કથ્યતામ્ ॥ ૪૭॥

શ્રીવસિષ્ઠ ઉવાચ ।
સ્વવદાતચિદાકાશકચનં જગદુચ્યતે ।
સ્ફુરણે પયસામબ્ધાવાવર્તચલનં યથા ॥ ૪૮॥

ધ્વનન્તોઽબ્ધિજલાનીવ ભાન્તિ ભાવાશ્ચિદાત્મકાઃ ।
સઙ્કલ્પાદીનિ નામાનિ તેષામાહુર્મનીષિણઃ ॥ ૪૯॥

કાલેનાભ્યાસયોગેન વિચારેણ સમેન ચ ।
જાતેર્વા સાત્ત્વિકત્વેન સાત્ત્વિકેનામલાત્મના ॥ ૫૦॥

સમ્યગ્જ્ઞાનવતો જ્ઞસ્ય યથા ભૂતાર્થદર્શિનઃ ।
બુદ્ધિર્ભવતિ ચિન્માત્રરૂપા દ્વૈતૈક્યવર્જિતા ॥ ૫૧॥

નિરાવરણવિજ્ઞાનમયી ચિદ્બ્રહ્મરૂપિણી ।
સંવિત્પ્રકાશમાત્રૈકદેહાદેહવિવર્જિતા ॥ ૫૨॥

સોઽયં પશ્યત્યશેષેણ યાવત્સઙ્કલ્પમાત્રકમ્ ।
સ્વમાત્મકચનં શાન્તમનન્યત્પરમાર્થતઃ ॥ ૫૩॥

અસ્યા ઇદં હિ સઙ્કલ્પમાત્રમેવાખિલં જગત્ ।
યથાસઙ્કલ્પનગરં યથા સ્વપ્નમહાપુરમ્ ॥ ૫૪॥

આત્મા સ્વસઙ્કલ્પવરઃ સ્વવદાતો યથા યથા ।
યદ્યથા સઙ્કલ્પયતિ તથા ભવતિ તસ્ય તત્ ॥ ૫૫॥

સઙ્કલ્પનગરે બાલઃ શિલાપ્રોડ્ડયનં યથા ।
સત્યં વેત્ત્યનુભૂયાશુ સ્વવિધેયનિયન્ત્રણમ્ ॥ ૫૬॥

સ્વસઙ્કલ્પાત્મભૂતેઽસ્મિન્પરમાત્મા જગત્ત્રયે ।
વરશાપાદિકં સત્યં વેત્ત્યનન્યત્તથાત્મનઃ ॥ ૫૭॥

સ્વસઙ્કલ્પપુરે તૈલં યથા સિદ્ધ્યતિ સૈકતાત્ ।
કલ્પનાત્સર્ગસઙ્કલ્પૈર્વરાદીહ તથાત્મનઃ ॥ ૫૮॥

અનિરાવરણજ્ઞપ્તેર્યતઃ શાન્તા ન ભેદધીઃ ।
તતઃ સઙ્કલ્પનાદ્વૈતાદ્વરાદ્યસ્ય ન સિદ્ધ્યતિ ॥ ૫૯॥

યા યથા કલના રૂઢા તાવત્સાદ્યાપિ સંસ્થિતા ।
ન પરાવર્તિતા યાવદ્યત્નાત્કલ્પનયાન્યયા ॥ ૬૦॥

બ્રહ્મણ્યવયવોન્મુક્તે દ્વિતૈકત્વે તથા સ્થિરે ।
યથા સાવયવે તત્ત્વે વિચિત્રાવયવક્રમઃ ॥ ૬૧॥

શ્રીરામ ઉવાચ ।
અનિરાવરણાજ્ઞાનાત્કેવલં ધર્મચારિણઃ ।
શાપાદીન્સમ્પ્રયચ્છન્તિ યથા બ્રહ્મંસ્તથા વદ ॥ ૬૨॥

વસિષ્ઠ ઉવાચ ।
સઙ્કલ્પયતિ યન્નામ સર્ગાદૌ બ્રહ્મ બ્રહ્મણિ ।
તત્તદેવાનુભવતિ યસ્માત્તત્તાસ્તિ નેતરત્ ॥ ૬૩॥

બ્રહ્મ વેત્તિ યદાત્માનં સ બ્રહ્માયં પ્રજાપતિઃ ।
સ ચ નો બ્રહ્મણો ભિન્નં દ્રવત્વમિવ વારિણઃ ॥ ૬૪॥

સઙ્કલ્પયતિ યન્નામ પ્રથમોઽસૌ પ્રજાપતિઃ ।
તત્તદેવાશુ ભવતિ તસ્યેદં કલ્પનં જગત્ ॥ ૬૫॥

નિરાધારં નિરાલમ્બં વ્યોમાત્મ વ્યોમ્નિ ભાસતે ।
દુર્દૃષ્ટેરિવ કેશોણ્ડ્રં દૃષ્ટમુક્તાવલીવ ચ ॥ ૬૬॥

સઙ્કલ્પિતાઃ પ્રજાસ્તેન ધર્મો દાનં તપો ગુણાઃ ।
વેદાઃ શાસ્ત્રાણિ ભૂતાનિ પઞ્ચ જ્ઞાનોપદેશનાઃ ॥ ૬૭॥

તપસ્વિનોઽથ વાદૈશ્ચ યદ્ધ્યુરવિલમ્બિતમ્ ।
યદ્યદ્વેદવિદસ્તત્સ્યાદિતિ તેનાથ કલ્પિતમ્ ॥ ૬૮॥

ઇદં ચિદ્બ્રહ્મચ્છિદ્રં ખં વાયુશ્ચેષ્ટાગ્નિરુષ્ણતા ।
દ્રવોઽમ્ભઃ કઠિનં ભૂમિરિતિ તેનાથ કલ્પિતાઃ ॥ ૬૯॥

ચિદ્ધાતુરીદૃશો વાસૌ યદ્યત્ખાત્માપિ ચેતતિ ।
તત્તથાનુભવત્યાશુ ત્વમહં સ ઇવાખિલમ્ ॥ ૭૦॥

યદ્યથા વેત્તિ ચિદ્વ્યોમ તત્તથા તદ્ભવત્યલમ્ ।
સ્વપ્ને ત્વમહમાદીવ સદાત્માપ્યસદાત્મકમ્ ॥ ૭૧॥

શિલાનૃતં યથા સત્યં સઙ્કલ્પનગરે તથા ।
જગત્સઙ્કલ્પનગરે સત્યં બ્રહ્મણ ઈપ્સિતમ્ ॥ ૭૨॥

ચિત્સ્વભાવેન શુદ્ધેન યદ્બુદ્ધં યચ્ચ યાદૃશમ્ ।
તદશુદ્ધોઽન્યથા કર્તું ન શક્તઃ કીટકો યથા ॥ ૭૩॥

અભ્યસ્તં બહુલં સંવિત્પશ્યતીતરદલ્પકમ્ ।
સ્વપ્ને જાગ્રત્સ્વરૂપે ચ વર્તમાનેઽખિલં ચ સત્ ॥ ૭૪॥

સદા ચિદ્વ્યોમ ચિદ્વ્યોમ્નિ કચદેકમિદં નિજમ્ ।
દ્રષ્ટૃદૃશ્યાત્મકં રૂપં પશ્યદાભાતિ નેતરત્ ॥ ૭૫॥

એકં દ્રષ્ટા ચ દૃશ્યં ચ ચિન્નભઃ સર્વગં યતઃ ।
તસ્માદ્યથેષ્ટં યદ્યત્ર દૃષ્ટં તત્તત્ર સત્સદા ॥ ૭૬॥

વાય્વઙ્ગગસ્પન્દનવજ્જલાઙ્ગદ્રવભાવવત્ ।
યથા બ્રહ્મણિ બ્રહ્મત્વં તથાજસ્યાઙ્ગગં જગત્ ॥ ૭૭॥

બ્રહ્મૈવાહં વિરાડાત્મા વિરાડાત્મવપુર્જગત્ ।
ભેદો ન બ્રહ્મજગતોઃ શૂન્યત્વામ્બરયોરિવ ॥ ૭૮॥

યથા પ્રપાતે પયસો વિચિત્રાઃ કણપઙ્ક્તયઃ ।
વિચિત્રદેશકાલાન્તા નિપતન્ત્યુત્પતન્તિ ચ ॥ ૭૯॥

નિપત્ત્યૈવૈકયાઽઽકલ્પં મનોબુદ્ધ્યાદિવર્જિતાઃ ।
આત્મન્યેવાત્મનો ભાન્તિ તથા યા બ્રહ્મસંવિદઃ ॥ ૮૦॥

તાંભિ સ્વયં સ્વદેહેષુ બુદ્ધ્યાદિપરિકલ્પનાઃ ।
કૃત્વોરરીકૃતા સર્ગશ્રીરદ્ભિર્દ્રવતા યથા ॥ ૮૧॥

તદેવં જગદિત્યસ્તિ દુર્બોધેન મમ ત્વિદમ્ ।
અકારણકમદ્વૈતમજાતં કર્મ કેવલમ્ ॥ ૮૨॥

અસ્તસ્થિતિઃ શરીરેઽસ્મિન્યાદૃગ્રૂપાનુભૂયતેઃ ।
ઉપલાદૌ જડા સત્તા તાદૃશી પરમાત્મનઃ ॥ ૮૩॥

યથૈકસ્યાં સુનિદ્રાયાં સુષુપ્તસ્વપ્નકૌ સ્થિતૌ ।
તથૈતે સર્ગસંહારભાસૌ બ્રહ્મણિ સંસ્થિતે ॥ ૮૪॥

સુષુપ્તસ્વપ્નયોર્ભાતઃ પ્રકાશતમસી યથા ।
એકસ્યામેવ નિદ્રાયાં સર્ગાસર્ગૌ તથા પરે ॥ ૮૫॥

યથા નરોઽનુભવતિ નિદ્રાયાં દૃષદઃ સ્થિતિમ્ ।
પરમાત્માનુભવતિ તથૈતજ્જડસંસ્થિતિમ્ ॥ ૮૬॥

અઙ્ગષ્ઠસ્યાથવાઙ્ગુલ્યા વાતાદ્યસ્પર્શને સતિ ।
યોઽન્યચિત્તસ્યાનુભવો દૃષદાદૌ સ આત્મનઃ ॥ ૮૭॥

વ્યોમોપલજલાદીનાં યથા દેહાનુભૂતયઃ ।
તથાસ્માકમચિત્તાનામદ્ય નાનાનુભૂતયઃ ॥ ૮૮॥

કાલે કલ્પેષુ ભાન્ત્યેતા યથાહોરાત્રસંવિદઃ ।
તથાઽસઙ્ખ્યાઃ પરે ભાન્તિ સર્ગસંહારસંવિદઃ ॥ ૮૯॥

આલોકરૂપમનનાનુભવૈષણેચ્છા
મુક્તાત્મનિ સ્ફુરતિ વારિઘને સ્વભાવાત્ ।
આવર્તવીચિવલયાદિ યથા તથાયં
શાન્તે પરે સ્ફુરતિ સંહૃતિસર્ગપૂગઃ ॥ ૯૦ ।
ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે
મોક્ષ-નિર્વાણ ઉત્તરાર્ધે બ્રહ્મગીતાસુ
સર્વં ખલ્વિદં બ્રહ્મેતિપ્રતિપાદનયોગોપદેશો
નામ ષડશીત્યધિકશતતમઃ ॥ ૧૮૬॥ -૧૪-

Encoded and proofread by Sunder Hattangadi

*Brahma Gita of Yoga Vasishtha*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*